# Shri Dhisha Gita

# શ્રી ધીશગીતા

## Document Information

Text title : shrIdhIshagItA

File name : shrIdhIshagItA.itx

Category : giitaa, gItA, ganesha, upanishhat

Location : doc_giitaa

Proofread by : Mohan Chettoor

Description/comments : See the Hindi translation of Shri Dhishagita

Acknowledge-Permission: Shri Bharat Dharma Mahamandal Varanasi

Latest update : November 19, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# Shri Dhisha Gita

## શ્રી ધીશગીતા

શ્રીગણેશાય નમઃ ।

### ૧. સ્વસ્વરૂપભાવનિરૂપણમ્

અથ પ્રથમોઽધ્યાયઃ ।

સૂત ઉવાચ ॥ ૧॥

ગુરો ! વેદાન્તતત્ત્વજ્ઞ ! વેદાર્થદ્યોતકાન્યહો ।
અનેકાનિ પુરાણાનિ કૃપાતઃ શ્રાવિતાનિ મે ॥ ૨॥

અનેકોપનિષત્સારરૂપા ગીતાશ્ચ કીર્ત્તિતાઃ ।
જાતોઽસ્મ્યહં તતો દેવ ! કૃતકૃત્યો ન સંશયઃ ॥ ૩॥

અશ્રૌષઞ્ચ ભવત્તોઽહં પુરાખ્યાનપ્રસઙ્ગતઃ ।
જગત્કર્તા જગદ્ધાતા જગજ્જન્માદિકારણમ્ ॥ ૪॥

જગત્પિતા જગદ્બન્ધુર્ભગવાન્ વિશ્વપાલકઃ ।
પરે બુદ્ધેઃ સ્થિતો બુદ્ધિમધિષ્ઠાય કૃપાવશાત્ ॥ ૫॥

મુક્તિં દદાતિ જીવેભ્યઃ શરણાગતવત્સલઃ ।
અતઃ સમ્પ્રોચ્યતે ધીશ આમ્નાયૈરખિલૈરસૌ ॥ ૬॥

ઇત્યપ્યાકર્ણિતં નાથ ! ભવતો વદનામ્બુજાત ।
યત્પુરાદિવ્યમાસાદ્ય ધીશલોકં મહર્ષયઃ ॥ ૭॥

શ્રીમદ્ગણપતેર્દેવાચ્છ્રૂતવન્તો હિતાઞ્છભાન્ ।
અનેકોપનિષત્સારોપદેશાન્મુક્તિદાયકાન્ ॥ ૮॥

તવાસીમકૃપારાશિર્મય્યાસ્તે યા તયૈવ મામ્ ।
દિવ્યાં ધીશર્ષિસંવાદરૂપાં પુણ્યમયીમતઃ ॥ ૯॥

જ્ઞાનદાં મુક્તિદાં શ્રવ્યાં ધીશગીતાં સુધોપમામ્ ।

કુરુષ્વ શ્રાવયિત્વામાં કૃતકૃત્યં કૃપાર્ણવ ! ॥ ૧૦॥

કસ્માન્મહર્ષિભિર્ધીશલોકઃ પ્રાપ્તઃ પુરા પ્રભો !
ક્વ વાસો ધીશલોકોઽસ્તિ કથમ્વા તત્ર ગમ્યતે ॥ ૧૧॥

કાન્યધ્યાત્મરહસ્યાનિ ધીશદેવેન પ્રોચિરે ।
શ્રાવયિત્વા ચ તત્સર્વં વ્યાસતો માં કૃતાર્થય ॥ ૧૨॥

યેન શ્રૌતરહસ્યં તત્પ્રચાર્યાઽહં પુનઃ પુનઃ ।
મુમુક્ષૂણાં કૃતે લોકે ધન્યઃ સ્યાં હિ સ્વયં ધ્રુવમ્ ॥ ૧૩॥

વ્યાસ ઉવાચ ॥ ૧૪॥

સૂત ! તે ધર્મજિજ્ઞાસાપ્રવૃત્ત્યા જન્મસિદ્ધયા ।
ભક્તયા ગુરોશ્ચ સદ્બુદ્ધયા વિશ્વકલ્યાણસક્તયા ॥ ૧૫॥

પ્રસન્નોઽસ્મ્યહમત્યન્તં સૌમ્યાત્તે ચ સ્વભાવતઃ ।
યત્ત્વં જિજ્ઞાસસે તાત ! યત્ત્વં યા શઙ્કસે હ્યતઃ ॥ ૧૬॥

તત્સમાધાનદાનેન નિતાન્તં મોદમાવહે ।
યતો મે પ્રિયશિષ્યોઽસિ મત્કૃપાપુઞ્જભાજનમ્ ॥ ૧૭॥

જિજ્ઞાસુપ્રાણિવૃન્દેભ્યઃ શિક્ષાદાનં નિરન્તરમ્ ।
મુમુક્ષુસાધકેભ્યશ્ચશ્ચ તત્ત્વજ્ઞાનોપદે શનમ્ ॥ ૧૮॥

વેદાનાં જ્ઞાનરૂપાણાં વિશ્વસ્મિંશ્ચ પ્રચારણમ્ ।
તેષાં પ્રકાશનઞ્ચાસ્તિ જીવનસ્ય વ્રતં મમ ॥ ૧૯॥

સૂત ! વિશ્વેશમાહાત્મ્યમચારઃ પુણ્યવર્દ્ધનઃ ।
સ્વભાવાદ્રોચતે મહ્યં તત્રાસિ ત્વં સહાયકઃ ॥ ૨૦॥

સાનન્દં પૂરયિષ્યેઽતઃ પ્રાર્થનામુત્તમામિમામ્ ।
સમાહિતમના બુદ્ધયા યુક્તઃ શ્રદ્ધાન્વિતઃ શ◌ૃણુ ॥ ૨૧॥

બ્રહ્માણ્ડમેતત્સપ્તાધઃ સપ્તોર્દ્ધ્વઞ્ચૈવ વિદ્યતે ।
ચતુર્દશમિતેષ્વેવં વિભક્તં ભુવનેષ્વહો ॥ ૨૨॥

ચતુર્દશમિતાન્યેતદ્ભુવનાન્યેવ કોવિદાઃ ।
ઊર્દ્ધ્વલોકાનધોલોકાન્ સપ્ત સપ્ત વદન્તિ ચ ॥ ૨૩॥

સ્વાભાવિક્યસુરાવાસભૂરધસ્તાદ્ ભવેત્તયોઃ ।

સપ્તલોક્યાં તથોવસ્થા સપ્તલોકી ચ દેવભૂઃ ॥ ૨૪॥

ચતુર્દશમિતાનાઞ્ચ ભુવનાનાં વિરાજતે ।
મધ્યસન્ધિસ્થિતો મૃત્યુલોકો મર્ત્યનિવાસભૂઃ ॥ ૨૫॥

અસૌ સૂત ! કિલ પ્રાજ્ઞૈર્ભૂલોકોઽપિ નિગદ્યતે ।
પાર્થિવો મૃત્યુલોકોઽસ્ય પિતૃલોકોઽસ્તિ દૈવિકઃ ॥ ૨૬॥

યુદ્ધે દેવાસુરે જાતે ક્વાચિત્કેઽપિ કદાચન ।
તયોર્નિવાસભૂમ્યોઃ સ્યાત્ કાદાચિત્કો વિપર્ય્યયઃ ॥ ૨૭॥

હે સૂતાધ્યાત્મરાજ્યસ્ય ચાલકા ઋષયો યતઃ ।
તચ્ચતુર્દશલોકેષુ ગતિસ્તેષામબાધિતા ॥ ૨૮॥

વાસસ્થાનાનિ તેષાન્તુ લોકાઃ સપ્તોર્દ્ધ્વવર્ત્તિનઃ ।
શ્રેણ્યોઽનેકા મહર્ષીણામૂર્દ્ધ્વલોકેષુ સન્ત્યતઃ ॥ ૨૯॥

તેષાં નિવાસભૂમીનાં નાના ભેદા નિરૂપિતાઃ ।
અધોલોકા યથા સપ્તાસુરભાવપ્રધાનકાઃ ॥ ૩૦॥

ભવન્ત્યસુરરાજેણ વિસ્તરાન્નિયમેન ચ ।
સર્વદા સર્વથા નૂનં નિતાન્તમનુશાસિતાઃ ॥ ૩૧॥

તથા નૈવોર્દ્ધ્વલોકેષુ દેવરાજાનુશાસનમ્ ।
આવશ્યકં વર્ત્તતે તે યતઃ સત્ત્વપ્રધાનકાઃ ॥ ૩૨॥

ઋષીણાં નિતરાં તત્ર સુલભાપ્યસ્તિ સઙ્ગતિઃ ।
યસ્માન્ન પુનરાવૃત્તિઃ સત્યલોકસ્ત્વસૌ સદા ॥ ૩૩॥

મુક્તાત્મભિસ્તપોનિષ્ઠૈર્યોગયુઞ્જાનમાનસૈઃ ।
બ્રહ્મસદ્ભાવસંયુક્તૈ ઋષિભિઃ પૂરિતોઽસ્ત્યલમ્ ॥ ૩૪॥

સમ્ભવઃ પુનરાવૃત્તેઃ સગુણાખિલલોકતઃ ।
સર્વેતઃ સગુણા લોકા ઊર્ધ્વસ્થાનાધિવર્ત્તિનઃ ॥ ૩૫॥

લોકયોઃ સન્ધિમધ્યસ્થાસ્તપઃસત્યાભિધાનયોઃ ।
નાત્ર ત્વં વિસ્મયં કુર્ય્યાઃ સૂત! દર્ભાગ્રધીષણ ! ॥ ૩૬॥

ઉર્ધ્વલોકેષુ સર્વેષુ નિશ્ચિતં નિવસન્ત્યહો ।
યથાધિકારસંલ્લબ્ધિ યથાસ્થાનં મહર્ષયઃ ॥ ૩૭॥

નિર્જરા નિખિલાઃ સૂત! લબ્ધ્વા યેષાં સુસઙ્ગતિમ્ ।
પારયન્તે સ્વધર્મસ્ય પાલનં કર્તુમુત્તમમ્ ॥ ૩૮॥

એકદા મિલિતા નૈકે પુરાકાલે મહર્ષયઃ ।
અધ્યાત્મતત્ત્વજિજ્ઞાસાસદ્વાઞ્છાભિશ્ચ પ્રેરિતાઃ ॥ ૩૯॥

એકાગ્રમાનસાઃ શ્રદ્ધાભક્તિભાવસમન્વિતાઃ ।
એકતત્ત્વયુતાઃ શાન્તા ધીશલોકમધિશ્રિતાઃ ॥ ૪૦॥

શ્રીમદ્ગણપતિં દેવં સજ્જ્ઞાનાનન્દવિગ્રહમ્ ।
તત્રૈત્ય ભગવન્તં તં પ્રાર્થયામાસુરાદરાત્ ॥ ૪૧॥

ઋષય ઊચુઃ ॥ ૪૨॥

ભગવન્ ! ધીશ ! સર્વજ્ઞ ! જગન્માન્ય ! જગદ્ગુરો ! ।
કૃપાતો ભવતો વેદાન્ પ્રાપ્તવન્તો વયં પુરા ॥ ૪૩॥

તેષામર્થાનુસન્ધાને કૃતકાર્ય્યા અભૂમ ચ ।
તવાસ્માભિઃ પરં નૈવ જ્ઞાતં રૂપં યથાર્થતઃ ॥ ૪૪॥

અતો નૈવભવચ્છાન્તિરસ્માકં ચેતસિ પ્રભો ! ।
વયં શરણમાપન્ના ભવલ્લોકમુપસ્થિતાઃ ॥ ૪૫॥

અદ્ય નઃ કૃપયા દેહિ સ્વરૂપજ્ઞાનમાત્મનઃ ।
તત્ત્વજ્ઞાનનિધેઃ સારં જ્ઞાનં તચ્છ્રાવયામૃતમ્ ॥ ૪૬॥

યત્સ્યાચ્ચોપનિષદ્રૂપમસ્મન્નિઃશ્રેયસપ્રદમ્ ।
ચિરશાન્તિકરં દેવ ! બ્રહ્માનન્દપ્રદાયકમ્ ॥ ૪૭॥

ગણપતિરુવાચ ॥ ૪૮॥

પારઙ્ગતોઽસ્મ્યલં વિપ્રાઃ ! સ્વસપ્તજ્ઞાનભૂમિતઃ ।
સચ્ચિદાનન્દરૂપેણ વિરાજે ચાહમવ્યયઃ ॥ ૪૯॥

વિભું મામપ્યહો ભક્તા ભાવુકાઃ સ્વેચ્છયા દ્વિજાઃ ! ।
નાનારૂપેષુ પશ્યન્તિ કૃતકૃત્યા ભવન્તિ ચ ॥ ૫૦॥

રૂપહીનોઽસ્મ્યહં વિપ્રાઃ ! શ્રદ્ધાવન્તસ્તથાપિ મે ।
ભક્તા માં સ્થૂલરૂપે વા જ્યોતીરૂપે નિરીક્ષ્ય ચ ॥ ૫૧॥

સાનન્દાઃ કૃતકૃત્યાઃ સ્યુર્નાત્ર કાર્ય્યા વિચારણા ।

સ્યુઃ પ્રપઞ્ચમયાદસ્માત્ સ્થૂલાદ્વૈ વિષયાત્પરે ॥ ૫૨॥

ઇન્દ્રિયૌઘાસ્તતઃ સન્તિ તન્માત્રાણ્યખિલાનિ ચ ।
તન્માત્રેભ્યઃ પરે પારે વૃત્તયશ્ચ ભવન્ત્યહો ॥ ૫૩॥

તાભ્યઃ પારં ગતા ભાવા ભાવેભ્યોઽપિ પરં મહત્ ।
મહતોઽપિ પરં નિત્યં કુર્વતે દર્શનં મમ ॥ ૫૪॥

જ્ઞાનિનો યોગાનિષ્ણાતા ભક્તા મે તત્ત્વચિન્તકાઃ ।
એતદ્રૂપં પરં જ્ઞાત્વા ચિરં શાન્તિમવાપ્નુત ॥ ૫૫॥

અહમેવાસ્મિ સદ્રૂપશ્ચિદ્રૂપોઽપિ મહર્ષયઃ ! ।
અહમાનન્દરૂપોઽસ્મિ નૂનમત્ર ન સંશયઃ ॥ ૫૬॥

વિભુશ્ચ નિર્વિકારોઽહં નિરાકારશ્ચ નિર્ગુણઃ ।
દ્વન્દ્વાતીતશ્ચ નિર્લિપ્તો જ્ઞાનરૂપોઽપ્યહં ધ્રુવમ્ ॥ ૫૭॥

સ્વરૂપાવસ્થિતૌ મૂલ-પ્રકૃતિર્મે મહર્ષયઃ ।
મલ્લીના ભાવમદ્વૈતમાવિર્ભાવયતેતરામ્ ॥ ૫૮॥

સા વ્યુત્થાનદશાયાન્તુ સ્વં રૂપં ત્રિગુણાત્મકમ્ ।
ધૃત્વા દૃશ્યમપઞ્ચસ્ય સૃષ્ટિસ્થિતિલયક્રિયાઃ ॥ ૫૯॥

કુર્વાણ્રાઽઽસ્તે સદા વિપ્રાઃ! મદાજ્ઞાવશવર્ત્તિની ।
મત્પ્રકૃત્યાશ્ચ ભો વિપ્રાઃ! તમસ્સત્ત્વરજોગુણાઃ ॥ ૬૦॥

જ્ઞાયન્તે સચ્ચિદાનન્દરૂપૈર્ભાવૈસ્ત્રિભિર્મમ ।
નન્વધ્યાત્માધિદૈવા ધિભૂતભાવૈરહો ત્રિભિઃ ॥ ૬૧॥

આવિર્ભૂયાત્મભક્તેભ્યો જ્ઞાનિભ્યઃ સત્ત્વરં ધ્રુવમ્ ।
અહમેવ પ્રયચ્છામિ તત્ત્વજ્ઞાનં ન સંશયઃ ॥ ૬૨॥

તદા મે જ્ઞાનિનો ભક્તા ભાવત્રય્યાશ્રયાદ્ધ્રુવમ્ ।
અઘટ્યઘટનાયાં યા પ્રકૃતિર્મે પટીયસી ॥ ૬૩॥

તસ્યાસ્ત્રૈગુણ્યમય્યા હિ કૃત્વા તાત્ત્વિકદર્શનમ્ ।
મામકીનાં લભન્તેઽન્તે મુક્તિં સાયુજ્યનામિકામ્ ॥ ૬૪॥

ત્રિભાવાત્મકમેવાસ્તિ તટસ્થજ્ઞાનમદ્ભુતમ્ ।
મત્સ્વરૂપાવબોધાય સૂપાયઃ સર્વથોત્તમઃ ॥ ૬૫॥

મત્કારણદશાયાં વૈ સચ્ચિદાનન્દરૂપિણઃ ।
ત્રિભાવા અવતિષ્ઠન્તેઽદ્વૈતરૂપે ન સંશયઃ ॥ ૬૬॥

નન્વધ્યાત્માધિદેવાધિભૂતભાવૈસ્ત્રિભિર્ધ્રુવમ્ ।
પ્રકૃતેર્મે પ્રજાતસ્ય કાર્યબ્રહ્મણ એવ હિ ॥ ૬૭॥

અઙ્ગોપાઙ્ગાનિ સર્વાણિ વ્યાપ્નુવન્નુ પૃથક્ પૃથક્ ।
વિશ્વં પ્રકાશયે સર્વમહં વૈચિત્ર્યસઙ્કુલમ્ ॥ ૬૮॥

સ્થાનં તન્નાસ્તિ વિશ્વસ્મિન્ વ્યાપ્તં યન્ન ત્રિભાવતઃ ।
યદ્બ્રહ્મેશવિરાડ્રૂપૈઃ પશ્યન્તો જ્ઞાનિનો હિ મામ્ ॥ ૬૯॥

ઉન્મજ્જન્તિ નિમજ્જન્તિ ભક્તા મે ભક્તિસાગરે ।
તત્રાપિ કારણં વિત્ત નિત્યભાવત્રયં ખલુ ॥ ૭૦॥

યત્તદ્બ્રહ્મ મનોવાચામઙ્ગોચરમિતીરિતમ્ ।
તત્ સર્વકારણં વિત્ત સર્વાધ્યાત્મિકમિત્યપિ ॥ ૭૧॥

અનાદ્યન્તમજં દિવ્યમજરં ધ્રુવમવ્યયમ્ ।
અપ્રતર્ક્યમવિજ્ઞેયં બ્રહ્માગ્રે સમ્પ્રવર્તતે ॥ ૭૨॥

સ્વેચ્છયા માયયા યત્તજ્જગજ્જન્માદિકારણમ્ ।
ઈશ્વરાખ્યં તુ તત્તત્વમધિદૈવમિતિ સ્મૃતમ્ ॥ ૭૩॥

સર્વજ્ઞઃ સદ્ગુરુર્નિત્યો હ્યન્તર્યામી કૃપાનિધિઃ ।
સર્વસદ્ગુણસારાત્મા દોષશૂન્યઃ પરઃ પુમાન્ ॥ ૭૪॥

યત્કાર્યબ્રહ્મ વિશ્વસ્ય નિધાનં પ્રાકૃતાત્મકમ્ ।
વિરાડીખ્યં સ્થૂલતરમધિભૂતં તદુચ્યતે ॥ ૭૫॥

પુનર્વઃ સમ્પ્રવક્ષ્યેઽહં શ્રૂયતાં તત્ત્વમુત્તમમ્ ।
નન્વધ્યાત્માધિદૈવાધિભૂતભાવત્રયાનુગમ્ ॥ ૭૬॥

યયાધ્યાત્માધિદૈવાધિભૂતભાવત્રયં દ્વિજાઃ ! ।
વિદ્યતે કારણે નૂનં કાર્યેષ્વપિ તથૈવ તત્ ॥ ૭૭॥

વિસ્તરાત્સમ્પ્રવક્ષ્યેઽહં તત્સ્વરૂપં નિશમ્યતામ્ ।
અહમેવ સ્વકીયાં તાં મહામાયામુપાશ્રિતઃ ॥ ૭૮॥

વિભ્રાણોઽધ્યાત્મભાવેન ઋષિરુપં સદોત્તમમ્ ।
તથાધિદૈવભાવેન દેવતારૂપમાદધેત્ ॥ ૭૯॥

તથાધિભૂતભાવેન પિતૃરૂપમધિશ્રયન્ ।
નાનાબ્રહ્માણ્ડસઙ્ઘાતં સંરક્ષામિ મહર્ષયઃ ! ॥ ૮૦॥

આકાશં પ્રથમં ભૂતં શ્રોત્રમધ્યાત્મમુચ્યતે ।
અધિભૂતં તથા શબ્દો દિશસ્તત્રાધિદૈવતમ્ ॥ ૮૧॥

દ્વિતીયં મારુતં ભૂતં ત્વગધ્યાત્મં ચ વિશ્રુતમ્ ।
સ્પષ્ટવ્યમધિભૂતશ્ચ વિદ્યુત્તત્રાધિદૈવતમ્ ॥ ૮૨॥

તૃતીયં જ્યોતિરિત્યાહુશ્ચક્ષુરધ્યાત્મમુચ્યતે ।
અધિભૂતં તતો રૂપં સૂર્યસ્તત્રાધિદૈવતમ્ ॥ ૮૩॥

ચતુર્થમાપો વિજ્ઞેયં જિહ્વા ચાધ્યાત્મમુચ્યતે ।
અધિભૂતં રસશ્ચાત્ર સોમસ્તત્રાધિદૈવતમ્ ॥ ૮૪॥

પૃથિવી પઞ્ચમં ભૂતં ઘ્રાણઞ્ચાધ્યાત્મમુચ્યતે ।
અધિભૂતં તથા ગન્ધો વાયુસ્તત્રાધિદૈવતમ્ ॥ ૮૫॥

પાદાવધ્યાત્મમિત્યાહુર્બ્રાહ્મણાસ્તત્ત્વદર્શિનઃ ।
અધિભૂતં તુ ગન્તવ્યં વિષ્ણુસ્તત્રાધિદૈવતમ્ ॥ ૮૬॥

અવાગ્ગતિરપાનશ્ચ પાયુરધ્યાત્મમુચ્યતે ।
અધિભૂતં વિસર્ગશ્ચ મિત્રસ્તભાર્દૈવતમ્ ॥ ૮૭॥

પ્રજનઃ સર્વભૂતાનામુપસ્થોઽધ્યાત્મનુચ્યતે ।
અધિભૂતં તથા શુક્રં દૈવતઞ્ચ પ્રજાપતિઃ ॥ ૮૮॥

હસ્તાવધ્યાત્મમિત્યાહુરધ્યાત્મવેદિનો જનાઃ ।
અધિભૂતં ચ કર્માણિ શક્રસ્તત્રાધિદૈવતમ્ ॥ ૮૯॥

વૈશ્વદેવી તતઃ પૂર્વા વાગધ્યાત્મમિહોચ્યતે ।
વક્તવ્યમધિભૂતઞ્ચ વહ્નિસ્તત્રાધિદૈવતમ્ ॥ ૯૦॥

અહઙ્કારસ્તથાસ્ધ્યાત્મં સર્વસંસારકારકમ્ ।
અભિમાનોઽધિભૂતઞ્ચ રુદ્રસ્તત્રાધિદૈવતમ્ ॥ ૯૧॥

બુદ્ધિરધ્યાત્મમિત્યાહુર્યથાવદભિદર્શિનઃ ।
બોદ્ધવ્યમધિભૂતં તુ ક્ષેત્રજ્ઞશ્ચાધિદૈવતમ્ ॥ ૯૨॥

અધ્યાત્મં મન ઇત્યાહુઃ પઞ્ચભૃતાત્મવારકમ્ ।

અધિભૂતઞ્ચ સઙ્કલ્પશ્ચન્દ્રમાશ્ચાધિદૈવતમ્ ॥ ૯૩॥

વેદઃ શબ્દમયં જ્ઞેયં મત્સ્વરૂપં ન સંશયઃ ।
મન્ત્રાસ્તત્રાધિભુતં સ્યાદીશ્વરશ્ચાધિદેવતમ્ ॥ ૯૪॥

જ્ઞાનમધ્યાત્મમિત્યાહુર્વેદનિષ્ણાતબુદ્ધયઃ ।
સરસ્વત્યાશ્ચ ગાયત્ર્યાઃ સાવિત્ર્યાશ્ચ તથૈવ હિ ॥ ૯૫॥

મચ્છક્તિરેવ વેદેષુ ત્રીણિ રૂપાણિ વિભ્રતી ।
જ્ઞાનશક્તિઃ ક્રિયાશક્તિર્યજ્ઞશક્તિસ્તથા દ્વિજાઃ ॥ ૯૬॥

એતચ્છક્તિત્રયં નૂનં સમુત્પાદયતેતરામ્ ।
નાત્ર કશ્ચન સન્દેહો વિદ્યતે વિપ્રપુઙ્ગવાઃ ! ॥ ૯૭॥

નિગમાગમયોરૈક્યાચ્છાસ્ત્રેઽપિ વેદસમ્મતે ।
સાદૃશ્યં તુ ત્રિભાવાનામેવમેવાસ્ત્યસંશયમ્ ॥ ૯૮॥

અન્તઃકરણમેવાસ્તિ કારણં બન્ધમોક્ષયોઃ ।
અહઙ્કારો મનો બુદ્ધિશ્ચિત્તશ્ચૈતચ્ચતુષ્ટયમ્ ॥ ૯૯॥

તત્રાધિભૂતમેવાસ્તિ બ્રહ્મા તત્રાધિદૈવતમ્ ।
મમાનન્દવિલાસશ્ચ તત્રાધ્યાત્મં સમુચ્યતે ॥ ૧૦૦॥

જગદ્ધારકધર્મસ્યાધિભૂતં કર્મ પ્રોચ્યતે ।
ઉપાસનાધિદૈવં સ્યાદધ્યાત્મં જ્ઞાનમુચ્યતે ॥ ૧૦૧॥

ધર્માઙ્ગેષ્વપિ સર્વેષુ પ્રત્યેકં વિદ્યતે દ્વિજાઃ ! ।
સમ્બન્ધો હિ ત્રિભાવાનાં સંશયો નાત્ર કશ્ચન ॥ ૧૦૨॥

વેદ એવાસ્તિ ભો વિપ્રાઃ ! મદાજ્ઞાયાઃ પ્રકાશકઃ ।
વેદસમ્મતશાસ્ત્રાણિ તસ્ય વ્યાખ્યાનિભાનિચ ॥ ૧૦૩॥

અહમેવાસ્મ્યતો વેદે શાસ્ત્રેષુ તત્પરેષુ ચ ।
લૌકિકી પરકીયા ચ સમાધિનામિકા તથા ॥ ૧૦૪॥

એતસ્ત્રયેણ ધૃત્વાઽહં ત્રિભાવં ભામિ સન્તતમ્ ।
અધિભૂતઞ્ચ વિદ્યાનાં સર્વાસાં શાસ્ત્રમુચ્યતે ॥ ૧૦૫॥

અધિદૈવમૃષિઃ પ્રોક્તમધ્યાત્મં વેદ ઉચ્યતે ।
અધિભૂતં ધ્રુવં સૃષ્ટેઃ પિણ્ડસૃષ્ટિમહર્ષયઃ ! ॥ ૧૦૬॥

બ્રહ્માણ્ડસૃષ્ટિરેવાસ્તિ નૂનં તત્રાધિદૈવતમ્ ।
સચ્ચિતોર્નિત્યમાનન્દવિલાસોઽધ્યાત્મમુચ્યતે ॥ ૧૦૭॥

અનન્તકોટિબ્રહ્માણ્ડ-કારણં યચ્ચ પ્રોચ્યતે ।
પિણ્ડનાશોઽવિભૂતં સ્યાત્પ્રલયસ્ય મહર્ષયઃ ॥ ૧૦૮॥

પ્રાહુરજ્ઞાશ્ચ યં મૃત્યું જીવાનાં રોમહર્ષણમ્ ।
બ્રહ્માણ્ડપ્રલયશ્ચાસ્તિ વિપ્રાઃ તત્રાધિદૈવતમ્ ॥ ૧૦૯॥

અધ્યાત્મં તત્ર જીવાનાં મત્સાયુજ્યસમાગમઃ ।
જીવસ્યાવરણં નૂનં બન્ધકારણમુચ્યતે ॥ ૧૧૦॥

અધિભૂતં હિ યસ્યાસ્તિ કોષાણાં પઞ્ચકં બુધાઃ ! ।
અધિદૈવમવિદ્યા મે સત્સત્તાઽધ્યાત્મમુચ્યતે ॥ ૧૧૧॥

સામઞ્જસ્યસુરક્ષાર્થં સૃષ્ટેરુત્પદ્યતે તુ યઃ ।
દેવાસુરાખ્યસઙ્ગ્રામઃ પૂર્ણઃ સોઽપિ ત્રિભાવતઃ ॥ ૧૧૨॥

વિજ્ઞા મહર્ષયો નાત્ર કાચિત્ કાર્ય્યા વિચારણા ।
ધર્માધર્મામયીનાં યદ્વૃત્તીનાં દ્વન્દ્વસઙ્ગરમ્ ॥ ૧૧૩॥

અન્તઃકરણમાસાદ્ય જાયતે નિત્યમદ્ભુતમ્ ।
દેવાસુરાખ્યયુદ્ધસ્ય તદેવાધ્યાત્મમુચ્યતે ॥ ૧૧૪॥

દેવાસુરં દેવલોકે યુદ્ધં નૈમિત્તિકં તુ યત્ ।
ભવેત્તદેવ ભો વિપ્રા આસ્તે ખલ્વધિદૈવતમ્ ॥ ૧૧૫॥

દૈવીનામાસુરીણાઞ્ચ સમ્પત્તીનાં પ્રભાવતઃ ।
જાયતે મૃત્યુલોકે યન્મહાયુદ્ધં પરસ્પરમ્ ॥ ૧૧૬॥

અધિભૂતં તદેવાસ્તિ તસ્ય યુદ્ધસ્ય નિશ્ચિતમ્ ।
મમૈવ પ્રકૃતિર્નૂનમાશ્રયેણ મમૈવ તુ ॥ ૧૧૭॥

આવિર્ભાવયતે સૃષ્ટિ-પ્રપઞ્ચં સન્તતં દ્વિજાઃ ! ।
કારણં બન્ધનસ્યાતઃ પ્રકૃતે મેં ગુણત્રયમ્ ॥ ૧૧૮॥

યે ત્રિભાવાશ્રયાન્મે તુ પશ્યન્તિ પ્રકૃતિં મમ ।
ત્રિભિર્ગુણૈર્ન બધ્યન્તે પ્રકૃતેસ્તે કદાચન ॥ ૧૧૯॥

મામકીનં સ્વકીયઞ્ચ ગૃહીત્વાઽઽદર્શમુત્તમમ્ ।
મમૈષા પ્રકૃતિર્વિપ્રાઃ ! સંસારેઽપારસીમનિ ॥ ૧૨૦॥

નારીધારાં નૃધારાઞ્ચ પ્રોત્પાદ્ય વિશ્વમશ્નુતે ।
અતો ધારાદ્વયેઽસ્મિંશ્ચ બન્ધમોક્ષદશાદ્વયમ્ ॥ ૧૨૧॥

કર્તું સાર્થકમેવાસ્તિ દ્વિધા ભાવત્રયં ખલુ ।
સૃષ્ટેર્દશાયાં દમ્પત્યોઃ ક્ષેત્રબીજે મહર્ષયઃ ॥ ૧૨૨॥

અધિભૂતં તથા ચાસ્તે પિતરસ્ત્વધિદૈવતમ્ ।
ભૂતભાવોદ્ભવકરો વિસર્ગઃ કર્મસંજ્ઞિતઃ ॥ ૧૨૩॥

અધ્યાત્મં પ્રોચ્યતે તત્ર નાત્ર કશ્ચન સંશયઃ ।
મુક્તેર્દશાયાં દમ્પત્યોર્મલ્લિઙ્ગં પ્રકૃતિશ્ચ મે ॥ ૧૨૪॥

અધિભૂતં તથાસ્તે સચ્ચિદ્ભાવાવધિદૈવતમ્ ।
પરમાનન્દ એવાસ્તિ તત્રાધ્યાત્મં ન સંશયઃ ॥ ૧૨૫॥

બ્રાહ્મણાઃ ! ઇત્થમેવાહં ત્રિભાવૈર્દેશકાલયોઃ ।
પાત્રોઽપિ દર્શનં દત્વા સ્વભક્તાન્ જ્ઞાનિનો ધ્રુવમ્ ॥ ૧૨૬॥

પ્રકૃતેર્બન્ધનાન્નૂનં મોચયામિ ન સંશયઃ ।
એતદ્ગૂઢરહસ્યં વઃ કથિતં વિપ્રપુઙ્ગવાઃ ॥ ૧૨૭॥

શુદ્ધભાવમયો યશ્ચ પૂર્ણશક્તિપ્રકાશકઃ ।
ઓં તત્સદિતિ મન્ત્રો હિ સદ્ભાવત્રયવાચકઃ ॥ ૧૨૮॥

ભાવનાભિસ્તદર્થાનાં તજ્જપૈશ્ચ નિરન્તરમ્ ।
મદ્ભક્તૈર્જ્ઞાનનિષ્ણાતૈર્મન્ત્રતત્ત્વપરાયણૈઃ ॥ ૧૨૯॥

અવિભક્તજ્ઞાનપૂર્ણા તૈરન્તર્દૃષ્ટિરાપ્યતે ।
મમૈવ સચ્ચિદાનન્દ-ભાવત્રયસમાશ્રયાત્ ॥ ૧૩૦॥

નન્વધ્યાત્માધિદૈવાધિભૂતરૂપં મહર્ષયઃ ! ।
ભાવત્રયં હિ સર્વસ્મિન્ કાર્ય્યબ્રહ્મણિ ભાસતે ॥ ૧૩૧॥

દૃશ્યં નાતો ભવેત્ કિઞ્ચિચ્છૂન્યં ભાવત્રયેણ વૈ ।
પ્રાપ્ય ભક્તેઃ પરાકાષ્ઠાં જ્ઞાનયોગાન્તિમસ્થલીમ્ ॥ ૧૩૨॥

યદા મે જ્ઞાનિનો ભક્તા માં દ્રષ્ટું શક્નુવન્તિ હ ।
સર્વેષુ દેશકાલેષુ તદા ભાવત્રયં મમ ॥ ૧૩૩॥

ભવન્ત્યનુભવન્તસ્તે મચ્ચિત્તા નાત્ર સંશયઃ ।

અઘટ્યઘટનાયાં યા પ્રકૃતિર્મે પટીયસી ॥ ૧૩૪॥

સા ત્રૈગુણ્યમયી દેવી તમઃસત્ત્વરજોઽભિધૈઃ ।
ત્રિભિગુણૈસ્તદા નાલં બદ્ધું ભક્તાન્ મમ પ્રિયાન્ ॥ ૧૩૫॥

અહો મત્પ્રકૃતિશ્ચૈવ વિદ્યારૂપં સમાશ્રિતા ।
નયતે જ્ઞાનિનો ભક્તાન્ મત્સાયુજ્યં ન સંશયઃ ॥ ૧૩૬॥

ઇતિ શ્રીધીશગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે
ધીશર્ષિસંવાદે સ્વસ્વરૂપભાવનિરૂપણં નામ પ્રથમોઽધ્યાયઃ ।

## ૨. સિદ્ધિસ્વરૂપનિરૂપણમ્

અથ દ્વિતીયોઽધ્યાયઃ ।
મહર્ષય ઊચુઃ ॥ ૧॥

જ્ઞાત્વા લોકોત્તરં દિવ્યં તત્ત્વાતીતં કૃપાનિધે ! ।
પરતત્ત્વાત્મકં સમ્યક્ સ્વરૂપં તે યથાર્થતઃ ॥ ૨॥

દૃશ્યપ્રઞ્ચજાતઞ્ચ પરિવ્યાપ્નુવતોઽખિલમ્ ।
ત્રિભાવાત્મકરૂપસ્ય રહસ્યં પરમાદ્ભુતમ્ ॥ ૩॥

સમાકર્ણ્ય વયં જાતાઃ કૃતકૃત્યા ન સંશયઃ ।
કિન્ત્વન્યદેવ નો જાતં પરં કૌતૂહલં હૃદિ ॥ ૪॥

પશ્યામઃ સામ્પ્રતં સપ્ત-જ્ઞાનભૂમેરુપર્ય્યહો ।
ભવન્તં મુખમાસીનં સુરમ્યે કમલાસને ॥ ૫॥

ધીશ ! સર્વજ્ઞ ! સર્વાત્મન્નાસિતસ્યાસ્ય તે વિભો! ।
સૌન્દર્યં કમલસ્યાસ્તે વાઙ્મનોબુદ્ધ્યગોચરમ્ ॥ ૬॥

શરીરં ભવતો ધીશ ! રક્તવર્ણમપિ પ્રભો ! ।
અતોતં સર્વવર્ણેભ્યો રક્તાદિભ્યોઽધુનાત્યલમ્ ॥ ૭॥

તર્પયત્યસ્મદીયાં વૈ રૂપદર્શનલાલસામ્ ।
ચક્રપદ્મત્રિશૂલસ્તુ મોદકેન ચ ભૂષિતૈઃ ॥ ૮॥

કરૈર્દિવ્યૈરેભિરસ્ત્રૈર્ભવાન્ નિત્યં ચતુર્ભુજઃ ।
કૈવલ્યાભ્યુદયૌ દાતુભિવાશ્વાસયતે ચ નઃ ॥ ૯॥

સમાધત્તે ચ નો બુદ્ધિ ભવાન્ ભૂત્વા ગજાનનઃ ।

ઉપદિષ્ટા વયં પૂર્વં ભવતા યત્તતસ્વ ॥ ૧૦॥

ઈશા જ્ઞાતું સ્વરૂપસ્ય રહસ્યં યત્કિમપ્યહો ।
સુન્દરીં લોહિતાઙ્ગીન્તુ ભવદ્વામાઙ્કવર્ત્તિનીમ્ ॥ ૧૧॥

શઙ્ખશક્ત્યબ્જચક્રાતિવિભૂષિતચતુર્ભુજામ્ ।
યાં વિશ્વમોહિનીં દેવીં ષોડશીં શક્તિશાલિનીમ્ ॥ ૧૨॥

પશ્યામો વયમેતસ્યાઃ સ્વરૂપસ્યાધુનાવધિ ।
નાજ્ઞાસિષ્મ રહસ્યં તત્ કૃપાં કૃત્વૈવ સામ્પ્રતમ્ ॥ ૧૩॥

“કાસ્તેઽસૌ ? તત્સ્વરૂપં કિં ? તદ્રહસ્યઞ્ચ વિસ્તૃતં ?”।
વ્યાસતો વર્ણયિત્વૈતત્ કૃતકૃત્યાન્ કુરુષ્વ નઃ ॥ ૧૪॥

ગણપતિરુવાચ ॥ ૧૫॥

શક્તિરેષા મમૈવાસ્તે સર્વકાર્યસહાયિકા ।
સિદ્ધિં નામ્ના ચ યામાહુર્બ્રાહ્મણા વેદપારગાઃ ॥ ૧૬॥

મમૈવ પ્રકતિર્વિપ્રાઃ ! સદા ત્રૈગુણ્યશોભિતા ।
અત્યન્તં સા પ્રસીદન્તી સિદ્ધિરૂપઞ્ચ વિભ્રતી ॥ ૧૭॥

સેવાયાં મે રતા નિત્યં મામુપાશ્રિત્ય રાજતે ।
પૂર્ણાઙ્ગલલિતા રમ્યા ષોડશી સર્વસુન્દરી ॥ ૧૮॥

ચક્રાબ્જશઙ્ખશક્તીનાં ધારિણી શક્તિરૂપિણી ।
સિદ્ધિર્વિદ્યોતતે નૈવ સેવાતો મે કદાચન ॥ ૧૯॥

અપિ ચેન્નિરપેક્ષોઽહં તત્સેવાઽઽદાનકર્મણિ ।
શુશ્રૂષતે તથાપ્યેષા ધૃત્વા રૂપં ચતુર્વિધમ્ ॥ ૨૦॥

નન્વધ્યાત્માધિદૈવાધિભૂતાનિ સહજં તથા ।
સિદ્ધેરસ્યા હિ રૂપાણિ ચત્વારિ બ્રાહ્મણોત્તમાઃ ! ॥ ૨૧॥

ઐશ્વર્ય્યસ્ય ચિતા યદ્વત્ બલસ્ય ચ સતા યથા ।
સમ્બન્ધઃ કર્મણઃ શક્ત્યા રૂપસ્ય તેજસા સહ ॥ ૨૨॥

તથૈવાસ્તે ચ સમ્બન્ધઃ સિદ્ધેઃ સાર્ધં મયા ધ્રુવમ્ ।
સમ્બન્ધોઽયમપૂર્વોઽસ્તિ નાત્ર કાર્ય્યા વિચારણા ॥ ૨૩॥

વિષ્ણોઃ પ્રિયા યથા લક્ષ્મીઃ પ્રિયા શ્યામા શિવસ્ય ચ ।

બ્રહ્મમય્યા મહાશક્તેઃ પ્રિય આસ્તે યથા પુનઃ ॥ ૨૪॥

ચિદ્વિલાસાત્મકો ભાવઃ સ્વકાર્યબ્રહ્મણઃ ખલુ ।
અરુણોઽસ્તિ યથા વિજ્ઞાઃ ! સૂર્યદેવસ્ય ચ પ્રિયઃ ॥ ૨૫॥

મહર્ષયસ્તથૈવાસ્તે સિદ્ધિરેષા હિ મે પ્રિયા ।
પરન્તુ નિર્વિકારં માં નિર્લિપ્તં જ્ઞાનરૂપિણમ્ ॥ ૨૬॥

સ્વપ્રેમાવરણે સિદ્ધિર્નાસજ્જયિતુમસ્ત્યલમ્ ।
અલૌકિકોઽસ્તિ સમ્બન્ધઃ સિદ્ધ્યૈવં મે મહર્ષયઃ ! ॥ ૨૭॥

મન્ત્રસિદ્ધિસ્તપઃસિદ્ધિર્યોગસિદ્ધિસ્તથૈવ ચ ।
એવં નાનાવિધા લોકે વિખ્યાતા યાશ્ચ સિદ્ધયઃ ॥ ૨૮॥

ઉત યાઃ સિદ્ધયો વિમા ઐશ્યઃ સન્ત્યણિમાદયઃ ।
જૈવ્યો વા સિદ્ધયઃ સન્તિ યા મેધાપ્રતિભાદયઃ ॥ ૨૯॥

ઔષધીસિદ્ધયો યાશ્ચ યા રસાયનમૂલિકાઃ !
પદાર્થસિદ્ધયો યાશ્ચ વિશ્વસ્મિન્મન્ત્રદર્શિનઃ ! ॥ ૩૦॥

બલસિદ્ધિર્દ્રવ્યસિદ્ધિસિદ્ધિશ્ચ પુરુષાર્થગા ।
સમ્મોહનાદયઃ ખ્યાતાઃ સન્તિ વા યાશ્ચ સિદ્ધયઃ ॥ ૩૧॥

જ્ઞાનસ્ય સિદ્ધયો નાના વેદશાસ્ત્રપ્રકાશિકાઃ ।
સર્વાસ્તાસ્સન્તિ મત્સિદ્ધેરઙ્ગભૂતા ન સંશયઃ ॥ ૩૨॥

જન્મૌષધિપદોપાસ્તિતપોમન્ત્રસમાધિભિઃ ।
સંયમેનાપિ લભ્યન્તે સિદ્ધયોઽલૌકિકા દ્વિજાઃ ॥ ૩૩॥

અષ્ટોપાયાઃ પ્રધાના હિ સન્તીમે સિદ્ધિલબ્ધયે ।
સન્તિ જાતિસ્મરત્વાદિસિદ્ધયો જન્મસિદ્ધયઃ ॥ ૩૪॥

યા સિદ્ધગુટિકા કાયકલ્પશ્ચૈવ રસાયનમ્ ।
અન્યા ચૈવંવિધા સિદ્ધિરોષધીસિદ્ધિરુચ્યતે ॥ ૩૫॥

નૈમિત્તિક્યશ્ચ યા દેવ શક્તયો રાજશક્તયઃ ।
અન્યાશ્ચૈવંવિધાઃ સર્વાઃ શક્તયઃ પદસિદ્ધયઃ ॥ ૩૬॥

ઉપાસ્તેઃ સિદ્ધયઃ સન્તિ દેવતાદર્શનાદયઃ ।
યાસુ સિદ્ધિષુ લબ્ધાસુ જાયતેઽભ્યુદયો ધ્રુવમ્ ॥ ૩૭॥

ષડ્ વશીકરણાદીનિ યાનિ કર્માણિ સન્તિ ચ ।
અન્યાન્યન્તર્ભવન્ત્યેવં મન્ત્રસિદ્ધૌ ન સંશયઃ ॥ ૩૮॥

નૈવાસ્ત્યેવમ્વિધા સિદ્ધિર્દૈવી વા કાપિ લૌકિકી ।
યા સંયમસમાધિભ્યાં લભ્યેત તપસા ન વા ॥ ૩૯॥

ચતુર્વિધા હિ લભ્યન્તે સિદ્ધયો નિશ્ચિતં દ્વિજાઃ ।
ઉપાયૈરષ્ટભિઃ પ્રોક્તૈર્નાત્ર કાર્ય્યા વિચારણા ॥ ૪૦॥

અનન્તાઃ સિદ્ધયો યાશ્ચ લોકે મચ્છક્તિસમ્ભવાઃ ।
વિભક્તાસ્સન્તિ તાસ્સર્વાશ્ચતુર્વૈવ મયા પુરા ॥ ૪૧॥

તાસાઞ્ચ લબ્ધયે નૂનમુપાયા અષ્ટ નર્મિતાઃ ।
તૈરેવ તાશ્ચ પ્રાપ્યન્તે નિશ્ચિતં વિપ્રપુઙ્ગવાઃ ! ॥ ૪૨॥

કુર્વાણા લૌકિકં કાર્ય્યં સન્તિ યાઃ સિદ્ધયોઽખિલાઃ ।
તા જ્ઞેયા નિખિલા વિપ્રા આધિભૌતિક સિદ્ધયઃ ॥ ૪૩॥

યા દૈવકાર્ય્યકારિણ્યઃ સિદ્ધયઃ સમ્પ્રકીર્ત્તિતાઃ ।
તા જ્ઞેયા આધિદૈવિક્યઃ સિદ્ધયો નિખિલાઃ ખલુ ॥ ૪૪॥

સિદ્ધયો જ્ઞાનવિજ્ઞાન-પ્રકાશિન્યશ્ચ યા ઇહ ।
આધ્યાત્મિક્યશ્ચ સર્વાસ્તાઃ સિદ્ધયઃ પ્રોચિરે બુધૈઃ ॥ ૪૫॥

ભવતાં મન્ત્રદ્રષ્ટૄણાં સિદ્ધયોઽન્તર્ગતા ઇહ ॥

નૈવાત્ર વિસ્મયઃ કાર્ય્યો ભવદ્ભિર્વિપ્રપુઙ્ગવાઃ ! ॥ ૪૬॥

સહજાખ્યા તુ યા સિદ્ધિર્વર્ત્તતે વિજ્ઞસત્તમાઃ ! ।
એતાભ્યઃ સર્વસિદ્ધિભ્યઃ સા નિતાન્તમલૌકિકી ॥ ૪૭॥

મમાવતારવૃન્દેઽસૌ સ્વત એવ પ્રકાશતે ।
તત્ત્વજ્ઞાનૈર્મહાત્માનો મનોનાશેન વૈ ધ્રુવમ્ ॥ ૪૮॥

નિર્વાસનતયા ચૈવોન્મૂલયન્તઃ સ્વજીવતામ્ ।
શિવરૂપીભવન્તશ્ચ સમાધૌ નિર્વિકલ્પકે ॥ ૪૯॥

તિષ્ઠન્તો યાન્તિ મય્યેવ લયમેકાન્તતો યદા ।
મદિચ્છયા તદા તેષુ સહજા કર્હિચિદ્ભવેત્ ॥ ૫૦॥

ઉન્નતાઃ સહજા બહ્વ્યઃ સિદ્ધયો યદ્યપિ દ્વિજાઃ ! ।

તાસ્વહો સન્તિ મુખ્યાસ્તુ ત્રયસ્ત્રિંશચ્ચ કેવલમ્ ॥ ૫૧॥

યોગિવૃન્દેઽવતારેષુ જીવન્મુક્તમહાત્મસુ ।
તપસ્વિષુ પ્રકાશન્તે ત્રયસ્ત્રિંશચ્ચ સિદ્ધયઃ ॥ ૫૨॥

સમાહિતૈર્ભવદ્ભિસ્તાઃ શ્રૂયન્તાં વર્ણયામ્યહમ્ ।
તાસાં નામાનિ પુણ્યાનિ ભવતામન્તિકે દ્વિજાઃ ! ॥ ૫૩॥

એતાઃ સર્વાઃ સિદ્ધયો હિ વેદશાસ્ત્રેષુ વર્ણિતાઃ ।
અણિમા લઘિમા પ્રાપ્તિઃ પ્રાકામ્યં મહિમા તથા ॥ ૫૪॥

વશિત્વં ગરિમેશિત્વે તથા કામાવસાયિતા ।
દૂરશ્રવણમેવાલં પરકાયપ્રવેશનમ્ ॥ ૫૫॥

મનોયાયિત્વમેવેતિ સર્વજ્ઞત્વમભીપ્સિતમ્ ।
વહ્નિસ્તમ્ભો જલસ્તમ્ભઃ ચિરજીવિત્વમેવ વા ॥ ૫૬॥

વાયુસ્તમ્ભઃ ક્ષુત્પિપાસાનિદ્રાસ્તમ્ભનમેવ ચ ॥

કાયવ્યૂહશ્ચ વાક્સિદ્ધિમૃતાનયનમીપ્સિતમ્ ॥ ૫૭॥

સૃષ્ટિસંહારકર્તૃત્વં પ્રાણાકર્ષણમેવ ચ ।
પ્રાણાનાઞ્ચ પ્રદાનઞ્ચ લોભાદીનાઞ્ચ સ્તમ્ભનમ્ ॥ ૫૮॥

ઇન્દ્રિયાણાં સ્તમ્ભનઞ્ચ બુદ્ધિસ્તમ્ભનમેવ ચ ।
કલ્પવૃક્ષત્વસત્યાનુસન્ધાને અમરત્વકમ્ ॥ ૫૯॥

અઘટ્યઘટનાયાં યા પ્રકૃતિર્મે પટીયસી ।
જગદ્વિમોહિની સૈવ મહામાયાપરાભિધા ॥ ૬૦॥

મહતો જ્ઞાનિનશ્ચૈવં યોગિનોઽપિ તપસ્વિનઃ ।
સિદ્ધિસાર્થૈરનેકૈર્હિ મોહયન્તી નિરન્તરમ્ ॥ ૬૧॥

આવાગમનચક્રેઽસ્મિન્ સ્વવિલાસાત્મકે મુહુઃ ।
મોક્ષમાર્ગઞ્ચ રુન્ધાના ઘૂર્ણયેત સમન્તતઃ ॥ ૬૨॥

બ્રાહ્મણાઃ ! પ્રકૃતિર્મેઽસૌ મહામાયાપરાભિધા ।
કિન્તુ મે જ્ઞાનિનો ભક્તાન્ મોહિતું ન કદાપ્યલમ્ ॥ ૬૩॥

કુલાઙ્ગનાનાં સાધ્વીનામઙ્ગાનામિવ દર્શનમ્ ।
જ્ઞાનિનાં મમ ભક્તાનાં ભવેત્ સિદ્ધિપ્રકાશનમ્ ॥ ૬૪॥

પુરુષાંશ્ચ પરાન્ કાંશ્ચિદ્ યથા કાચિત્ કુલાઙ્ગનાઃ ।
દર્શનાય નિજાઙ્ગાનાં ન ક્ષમન્તે કદાચન ॥ ૬૫॥

ભવન્ત્યુત્કણ્ઠિતાઃ કિન્તુ સર્વથા જનસંસદિ ।
દર્શનાય નિજાઙ્ગાનાં નિર્લજ્જાઃ કુલટા મુહુઃ ॥ ૬૬॥

સર્વસામર્થ્યવન્તોઽપિ મદ્ભક્તા જ્ઞાનિનસ્તથા ।
સિદ્ધિં સ્વાં નૈવ ભો વિપ્રાઃ! દ્યોતયન્તે કદાચન ॥ ૬૭॥

યોગિનો ભક્તિહીનાસ્તુ લક્ષ્યહીનાસ્તપસ્વિનઃ કે ।
સાધકા ઉગ્રકર્માણો જ્ઞાનહીનાસ્તથા દ્વિજા ! ॥ ૬૮॥

સ્વીયાઃ સિદ્ધીર્વણિગ્વૃત્ત્યા સમ્પ્રકાશ્ય પતન્ત્યલમ્ ।
પ્રકાશ્યાઃ સિદ્ધયો નૈવ સર્વથાતો મહાત્મભિઃ ॥ ૬૯॥

કદાચિદ્ભ્રાતરઃ પુત્રા આત્મીયાઃ સ્વજના ઉત ।
દૈવાદનિચ્છયેક્ષેરન્ યથાઙ્ગાનિ કુલસ્ત્રિયાઃ ॥ ૭૦॥

જ્ઞાનિનાં સમ ભક્તાનાં સિદ્ધીનાં વૈભવં તથા ।
પ્રકટત્વં હઠાયાતિ દૈવાલ્લોકે કદાચન ॥ ૭૧॥

હસ્તાભ્યાં મે યથા સિદ્ધિર્દ્વાભ્યાં વિપ્રા નિરન્તરમ્ ।
માયામોહિતજીવેભ્યઃ શક્ત્યર્થૌ પ્રદદત્યલમ્ ॥ ૭૨॥

બધ્નાત્યસ્મિન્ હિ સંસારે કારાગારે ચિરન્તને ।
તથાઽન્યાભ્યાં સ્વહસ્તાભ્યાં ધર્માર્થૌ વિતરન્ત્યહો ॥ ૭૩॥

પ્રદત્તે જ્ઞાનિભક્તેભ્યઃ કૈવલ્યાભ્યુદયૌ ધ્રુવમ્ ।
સાધકા મોહિતા અજ્ઞાઃ કર્મસ્વાસક્તમાનસાઃ ॥ ૭૪॥

માયયોત્પાદિતાઃ સિદ્ધીઃ સંસારે ક્ષણભઙ્ગુરાઃ ।
પરિણામસ્વભાવા હિ લબ્ધ્વા તત્સેવયા મુહુઃ ॥ ૭૫॥

નરકે સ્વર્ગલોકે ચ લોકયોઃ પિતૃપ્રેતયોઃ ।
નિત્યં ઘૂર્ણાયમાનાસ્તે સન્તપ્યન્તે ત્રિતાપતઃ ॥ ૭૬॥

કિન્તુ મે જ્ઞાનિનો ભક્તાઃ પરમાનન્દસાગરમ્ ।
સ્વરૂપં તત્ત્વતો જ્ઞાત્વા સચ્ચિદાનન્દરૂપકમ્ ॥ ૭૭॥

સમસ્તસિદ્ધિસર્વસ્વં મામેવ પ્રાપ્નુવન્ત્યલમ્ ।
નિરાપદં પદં શ્રેષ્ઠમધિકુર્વન્તિ મે તતઃ ॥ ૭૮॥

મચ્છક્તિરૂપિણી સિદ્ધિઃ પ્રભાવાત્યન્તશોભિની ।
મદ્ભક્તેર્વિમુખાઞ્જીવાન્ મત્તોઽલઞ્ચ નિવર્ત્ય સા ॥ ૭૯॥

સંસારાપારપાથોધાવજ્ઞાનાવર્ત્તસભ્રમે ।
નિપાત્ય નિતરાં શશ્વત્ ક્લિશ્નાતીહ મહર્ષયઃ ! ॥ ૮૦॥

ભજતોઽનન્યભક્ત્તથા માં ભૂયોઽસૌ સાધકાન્ વરાન્ ।
મત્સમીપં સમાનીય કૃતાર્થાન્ કુરુતે દ્રુતમ્ ॥ ૮૧॥

યથા સ્નેહમયી માતા સ્વાત્મજાનતિયત્નતઃ ।
વર્દ્ધયન્તી પ્રસાદેન પુષ્ણન્તી પાલયન્ત્યપિ ॥ ૮૨॥

અધિકારયતે ક્ષિપ્રં પરમં મઙ્ગલાસ્પદમ્ ।
તથા કારુણ્યપૂર્ણાઽસૌ સિદ્ધિર્માતેવ સર્વદા ॥ ૮૩॥

આર્ત્તાનર્થાર્થિનો ભક્તાન્, જિજ્ઞાસૂંસ્ત્રીનિમાન્મમ ।
નૂનમાનન્દસન્દોહમુત્સાહઞ્ચ દદત્યલમ્ ॥ ૮૪॥

વિધત્તેઽગ્રેસરાન્ ક્ષિત્રમાભિમુખ્યેન મે ચ તાન્ ।
મમ સેવારતાયાશ્ચ સ્વરૂપં પ્રકૃતેર્દ્વિધા ॥ ૮૫॥

વિભક્તં વર્ત્તતે વિજ્ઞાઃ ! નાત્ર કાર્ય્યા વિચારણા ।
એકા પરાભિધા જ્ઞેયા દ્વિતીયાસ્પરનામિકા ॥ ૮૬॥

અપરાનામિકા જીવાન્ પ્રકૃતિર્મેઽખિલાનલમ્ ।
ગુણત્રયાત્મકે જાલે સ્વસ્મિન્નાશ્લિષ્ય માયયા ॥ ૮૭॥

દ્વન્દ્વસ્યાનુભવં તૈશ્ચ કારયન્તી નિરન્તરમ્ ।
સ્વવિલાસાત્મકં લીલામયં જનયતે જગત્ ॥ ૮૮॥

પરા મેં પ્રકૃતિર્ધન્યા સાધકાનાં હૃદમ્બુજે ।
ભૃઙ્ગાવલીં પરાભક્તિં સન્નિવેશ્ય મહર્ષયઃ ! ॥ ૮૯॥

વીક્ષયન્તી ત્રયાણાઞ્ચ ગુણાનાં વૈભવં મુહુઃ ।
દ્વન્દ્વાતીતં પદં નીત્વા મામેનાન્ દર્શયત્યહો ॥ ૫૦॥

અતો વિજ્ઞવરા અત્ર પ્રકૃતેર્મે દશાદ્વયે ।
મમ સિદ્ધિસ્વરૂપસ્ય વિકાશોઽપિ દ્વિધા ભવેત્ ॥ ૯૧॥

અપરા સિદ્ધિરેકાસ્તિ દ્વિતીયા ચ પરામિધા ।

નૈકોક્તસિદ્ધિરૂપાણિ નાનારૂપાણિ બિભ્રતી ॥ ૯૨॥

સિદ્ધિર્મેઽસ્ત્યપરાનામ્ની નાત્ર વઃ સંશયો ભવેત્ ।
જ્ઞાનાધિકારિણો વિપ્રાઃ ! પૂજ્યા સિદ્ધિઃ પરાભિધા ॥ ૯૩॥

ચિન્મયી સાત્ત્વિકી નિત્યા હિતાઽદ્વૈતવિધાયિની ॥

સ્વરૂપાનન્દસન્દોહદ્યોતિની સા પ્રકીર્ત્તિતા ॥ ૯૪॥

ઐશ્યો મે સિદ્ધયો વિપ્રાઃ ! કામનામન્તરેણ મે ।
પ્રકટત્વં હિ સંસારે નૈવ યાન્તિ કદાચન ॥ ૯૫॥

મામકીના યતઃ શક્તિર્ન સ્વેચ્છાચારિણી ભવેત્ ।
અતો મમાવતારેષુ જ્ઞાનિષ્વપિ કદાચન ॥ ૯૬॥

મદ્ભક્તેષુ પ્રકાશેરન્નૈશ્યો મે સિદ્ધયઃ સ્વતઃ ।
મમાવતારવૃન્દાનામાવિર્ભાવો મહર્ષયઃ ॥ ૯૭॥

અથવા જ્ઞાનિભક્તેષુ હ્યૈશ્યાઃ સિદ્ધેઃ પ્રકાશનમ્ ।
સમષ્ટોર્જીવવર્ગસ્ય કર્મણો નિઘ્નમસ્ત્યહો ॥ ૯૮॥

સન્ત્યતઃ સિદ્ધયો વિપ્રા ઐશ્યોઽત્યન્તં સુદુર્લભાઃ ।
સ્વરૂપં મમ સિદ્ધેશ્ચ જ્ઞાત્વા સમ્યઙ્મહર્ષયઃ ॥ ૯૯॥

કદાચિદપરાસિદ્ધેર્માશ્રિષ્યધ્વં હિ બન્ધને ।
ચિન્મય્યા મે પરાસિર્મહત્ત્વં પરમાદ્ભુતમ્ ॥ ૧૦૦॥

જ્ઞાત્વોપાસ્ય ચ તામેવાદ્વૈતાનન્દપ્રકાશકમ્ ।
દ્વન્દ્વાતીતં લભધ્વં હિ શાશ્વતં પરમં પદમ્ ॥ ૧૦૧॥

સ્થિરં લક્ષ્યં વિધાયૈવં દ્વિજાઃ ! સિદ્ધિસ્વરૂપિણિ ।
આયુધે મોદકે નૂનં ત્રિશૂલે મે ત્રિતાપકે ॥ ૧૦૨॥

દૃષ્ટિક્ષેપં ન કુચરન્ ભવન્તો હિ કદાચન ।
ચક્રપદ્મસ્વરૂપૌ હિ ધર્મમોક્ષૌ નિરન્તરમ્ ॥ ૧૦૩॥

અગ્રેસરેયુઃ સંલક્ષ્ય બાધાં નેયુઃ કદાચન ।
સત્યમેતદ્ધિ જાનીત નાત્ર કશ્ચન સંશયઃ ॥ ૧૦૪॥

ઇતિ શ્રીધીશગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગ-
શાસ્ત્રે ધીશર્ષિસંવાદે સિદ્ધિસ્વરૂપનિરૂપણં

નામ દ્વિતીયોઽધ્યાયઃ ।

## ૩. જ્ઞાનભૂમિનિરૂપણમ્

અથ તૃતીયોઽધ્યાયઃ ।
મહર્ષય ઊચુઃ ॥ ૧॥

હે સર્વશક્તિમન્ ! ધીશ ! ભગવન્ ! સર્વસિદ્ધિદ ! ।
હે વિભો ! સર્વસિદ્ધીનાં નિત્યાધારસ્વરૂપવન્ ! ॥ ૨॥

પરાસિદ્ધેઃ કૃપાપ્રાપ્ત્યૈ પૂર્વં તદ્દર્શનં ધ્રુવમ્ ।
આવશ્યકીયમેવાસ્તિ તદુપાયાનતો વદ ॥ ૩॥

યૈર્નઃ સ્યાદ્દર્શનં નૂનં પરાસિદ્ધેર્નિરાપદમ્ ।
યથા વા નઃ કૃતાર્થત્વમુપદિશ્યામહે તથા ॥ ૪॥

ગણપતિરુવાચ ॥ ૫॥

વિદ્યાસ્વરૂપિણી નિત્યાં પરાસિદ્ધિં મદાશ્રયામ્ ।
તત્ત્વજ્ઞાનસુનિષ્ણાતાઃ મહાપૌરુષ્યશાલિનઃ ॥ ૬॥

દિવ્યદૃષ્ટ્યા નિરીક્ષન્તે જ્ઞાનિનો જ્ઞાનભૂમિષુ ।
તત્ત્વજ્ઞાઃ શાન્તચેતસ્કાઃ સાધકાસ્તુ યથાયથમ્ ॥ ૭॥

ક્રમાદગ્રેસરન્તીહ સપ્તસુ જ્ઞાનભૂમિષુ ।
મમ વિદ્યાસ્વરૂપાયાઃ પરાસિદ્ધેસ્તથાતથમ્ ॥ ૮॥

ઉત્તરોત્તરમત્યન્તં સ્પષ્ટ રૂપસ્ય દર્શનમ્ ।
પ્રાપ્નુવન્તો નિમજ્જન્તિ પરમાનન્દસાગરે ॥ ૯॥

અહં જ્ઞાનસ્વરૂપોઽસ્મિ નૂનં વિજ્ઞવરા દ્વિજાઃ ! ।
તટસ્થઞ્ચ સ્વરૂપઞ્ચ દ્વિવિધં જ્ઞાનમીરિતમ્ ॥ ૧૦॥

જ્ઞાતા જ્ઞાનં તથા જ્ઞેયમેષાં ભાનૈઃ સમન્વિતઃ ।
યત્ર ત્રિપુટિસમ્બન્ધો વિદ્યતે વિપ્રપુઙ્ગવાઃ ! ॥ ૧૧॥

જ્ઞાનં સ્યાત્તત્તટસ્થાખ્યં સ્વરૂપજ્ઞાનકારણમ્ ।
જ્ઞાનેઽસ્મિંશ્ચ તટસ્થાખ્યે સ્વરૂપસ્ય દ્વિજોત્તમાઃ ! ॥ ૧૨॥

સચ્ચિદાનન્દભાવાનામનુભૂતિઃ પૃથક પૃથક ।
સ્યાદતસ્તત્ર સમ્પૂર્ણં દૃશ્યજાતં પ્રતીયતે ॥ ૧૩॥

યત્ર ત્રિપુટિસમ્બન્ધલેશમાત્રં ન વિદ્યતે ।
સચ્ચિદાનન્દભાવાનામનુભૂતિઃ પૃથઙ્ન ચ ॥ ૧૪॥

યત્રાપ્યેતત્ત્રયં તિષ્ઠેદ્ભાવેઽદ્વૈતે નિરન્તરમ્ ।
ઉદેતિ નિશ્ચિતં તત્ર સ્વરૂપજ્ઞાનમુત્તમમ્ ॥ ૧૫॥

યતોઽસ્તિત્વં તટસ્થસ્યાહં મહત્તત્ત્વયોગતઃ ।
તટસ્થજ્ઞાનમસ્ત્યસ્માદ્બહુભાવૈઃ સમન્વિતમ્ ॥ ૧૬॥

પૂર્ણં જ્ઞાનં સ્વરૂપન્તુ શાશ્વતઞ્ચાવિકારિ ચ ।
તત્ત્વાતીતે પદેઽસ્ત્યસ્ય પરમે નિત્યસંસ્થિતિઃ ॥ ૧૭॥

પરિણામિતટસ્થાખ્યાજ્જ્ઞાનાન્નૂનં શનૈઃ શનૈઃ ।
સ્વરૂપમુદયજ્જ્ઞાનં યદાસ્તે વિપ્રપુઙ્ગવાઃ ! ॥ ૧૮॥

સર્વેષુ પ્રાણિવૃન્દેષ્વવિભક્તં નિખિલેષુ ચ ।
દેશેષુ સર્વકાલેષુ પાત્રેષુ વિવિધેષુ ચ ॥ ૧૯॥

વિકારરહિતં સર્વભૂતેષ્વેકત્વદર્શકમ્ ।
ઉન્નતં સાત્ત્વિકં જ્ઞાનં તત્ત્વજ્ઞેષુ મહાત્મસુ ॥ ૨૦॥

તદા પ્રકાશતે નૂનં સ્વત એવ ન સંશયઃ ।
તત્પ્રભાવાત્સ્વરૂપસ્ય જ્ઞાનસ્યાનુભવં કિલ ॥ ૨૧॥

કુર્વન્ત્યેવ નિરાયાસં મુક્તાત્માનો મહર્ષયઃ ।
નૈવાત્ર વિસ્મયઃ કાર્ય્યઃ સત્યમેતદ્બ્રવીમિ વઃ ॥ ૨૨॥

યથા શબ્દં વિનાઽઽકાશો વિના સ્પર્શં સમીરણઃ ।
રૂપેણૈવં વિના વહ્નિર્જલં ખલુ રસંવિના ॥ ૨૩॥

યથા ગન્ધં વિના પૃથ્વી નૈવ તિષ્ઠેત્ કદાચન ।
તથા તટસ્થજ્ઞાનસ્ય નોદયોઽહઙ્કૃતિં વિના ॥ ૨૪॥

નૈવ સમ્ભાવ્યતે કિન્તુ સ્વરૂપે દ્વૈતમણ્વપિ ।
અતો જ્ઞાનં સ્વરૂપાખ્યં સ્વસ્વરૂપં મમૈવ તત્ ॥ ૨૫॥

અવિદ્યાજનિતં વિપ્રા વિભક્તજ્ઞાનમત્સ્ય હો ।
વિદ્યાસમ્ભૂતમેવાસ્ત્યવિભક્તજ્ઞાનમુત્તમમ્ ॥ ૨૬॥

અસ્મ્યહં જ્ઞાનરૂપત્વાચ્ચેજ્જ્ઞાનદ્વયમધ્યહો ।

અવિભક્તં તથાપ્યેતજ્જ્ઞાનં દત્તે પરમ્મદમ્ ॥ ૨૭॥

મત્તો જીવાન્ દવયતે વિભક્તજ્ઞાનમત્યહો ।
વિભક્તજ્ઞાનતો નીત્વાઽવિભક્તજ્ઞાનમન્દિરમ્ ॥ ૨૮॥

મુમુક્ષૂન્ સ્વસ્વરુપં મે નૂનં નેતું નિરાપદમ્ ।
શ્રુતિભિર્વર્ણિતાઃ પૂર્વં સપ્તૈવ જ્ઞાનભૂમયઃ ॥ ૨૯॥

વિશ્વવન્ધનકર્ત્રીષુ સપ્તસ્વજ્ઞાનભૂમિષુ ।
અજ્ઞાનાન્ધાઃ સદા જીવા આસજ્જન્તે વિમોહિતાઃ ॥ ૩૦॥

શ્રૌતાનાં કર્મકાણ્ડાનાં સાહાય્યાત્સાધકાઃ ખલુ ।
પૂર્વં શરીરસઙ્ગુદ્ધિં મનઃશુદ્ધિં તતઃ પરમ્ ॥ ૩૧॥

કૃત્વા પશ્ચાન્મમોપાસ્ત્યા ચિત્તવૃત્તીઃ પ્રશમ્ય ચ ।
અધિકારં લભન્તેઽન્તે તત્ત્વજ્ઞાનસ્ય દુર્લભમ્ ॥ ૩૨॥

તતશ્ચ ક્રમશો વિપ્રાઃ ! સોપાનારોહણં યથા ।
જ્ઞાનભૂમીશ્ચ સપ્તૈવમતિક્રમ્ય શનૈઃ શનૈઃ ॥ ૩૩॥

જ્ઞાનપૂર્ણાન્તરાત્માનો મામન્તે પ્રાપ્નુવન્તિ તે ।
જ્ઞાનક્રમવિકાશૈર્હિ પૂર્ણાઃ સ્વાભાવિકૈરતઃ ॥ ૩૪॥

સપ્તૈતા જ્ઞાનભૂમ્યો મે પરાસિદ્ધેઃ કૃપાવશાત્ ।
સ્વરુપજ્ઞાનસઁલ્લબ્ધેર્વહન્તે હેતુતામલમ્ ॥ ૩૫॥

સપ્તાનાં જ્ઞાનભૂમીનાં પ્રથમા જ્ઞાનદા ભવેત્ ।
સન્યાસદા દ્વિતીયા સ્યાત્તૃતીયા યોગદા ભવેત્ ॥ ૩૬॥

લીલોન્મુક્તિશ્ચચતુર્થી સ્યાત્પઞ્ચમી સત્પદા સ્મૃતા ।
ષષ્ઠાનન્દપદા જ્ઞેયા સપ્તમી ચ પરાત્પરા ॥ ૩૭॥

યાવજ્જીવૈરતિક્રાન્તા ન સપ્તાઽજ્ઞાનભૂમયઃ ।
તાવન્ન પ્રથમા ભૂમિર્જ્ઞાનસ્ય જ્ઞાનદાઽઽપ્યતે ॥ ૩૮॥

ઉદ્ભિજ્જાનાં ચિદાકાશે પ્રથમાઽજ્ઞાનભૂમિકા ।
સ્વેદજાનાં ચિદાકાશે સા દ્વિતીયા પ્રકીર્તિતા ॥ ૩૯॥

તૃતીયાઽણ્ડજજાતેશ્ચાજ્ઞાનભૂમિશ્ચિદાશ્રિતા ।
જરાયુજપશૂનાઞ્ચ ચિદાકાશે ચતુર્થ્યસૌ ॥ ૪૦॥

પઞ્ચકોષપ્રપૂર્ણત્વાધિકારિષ્વેવ વૈ નૃષુ ।
સન્તિ શેષા અધિકૃતાસ્તિસ્રસ્ત્વજ્ઞાનભૂમયઃ ॥ ૪૧॥

તિસ્રસ્તા એવ કથ્યન્ત ઉત્તમાધમમધ્યમાઃ ।
વિશદં તાઃ પ્રચક્ષેઽહં શ્રૂયન્તાં વિપ્રપુઙ્ગવાઃ ! ॥ ૪૨॥

એતા અજ્ઞાનભૂમીર્હિ તિસૃરેવ સમૂલતઃ ।
મૂર્ત્તિમન્તઃ સ્વયં વેદા નિરાકર્તું સમુદ્યતાઃ ॥ ૪૩॥

અધમાઽજ્ઞાનભૂમૌ હિ યાવન્મર્ત્યઃ પ્રસજ્જતે ।
કૃતેઽપરાધે દણ્ડઃ સ્યાતિર્ય્યઙ્ગ્યોનૌ તદુદ્ભવઃ ॥ ૪૪॥

મધ્યમાજ્ઞાનભૂમેશ્ચ માનવૈરધિકારિભિઃ ।
પિતૃલોકાસ્તથા વિપ્રાઃ ! નારકાચ પુનઃ પુનઃ ॥ ૪૫॥

પ્રાપ્યન્તે મૃત્યુલોકશ્ચ સુખદુઃખાદિપુરિતઃ ।
દદાત્યૂર્ધ્વઞ્ચ સ્વર્લોકમુત્તમાઽજ્ઞાનભૂમિકા ॥ ૪૬॥

અધમાજ્ઞાનભૂમિઞ્ચ પ્રાપ્તા મર્ત્યા ભવન્ત્યહો ।
દેહાત્મવાદિનોઽનાર્ય્યા નાસ્તિકાઃ શૌચવર્જ્જિતાઃ ॥ ૪૭॥

મધ્યમાઽજ્ઞાનભૂમેસ્તુ માનવા અધિકારિણઃ ।
આસ્તિકત્વેન ભો વિપ્રાઃ સદ્વિચારપરાયણાઃ ॥ ૪૮॥

દેહાત્મનોર્હિ પાર્થક્યં વિશ્વસન્તોઽપિ સર્વથા ।
ઇન્દ્રિયાણાં સુખે મગ્ના નિતરામૈહલૌકિકે ॥ ૪૯॥

વિસ્મરન્તિ મહામૃઢાઃ સુખં તે પારલૌકિકમ્ ।
ઉત્તમાજ્ઞાનભૂમે પુણ્યવન્તોઽધિકારિણઃ ॥ ૫૦॥

આત્માઽતિરિક્તં મે શક્તમત્વાઽસ્તિત્વં દ્વિજર્ષભાઃ ।
સ્વર્ગીયસ્ય સુખસ્યૈવ જાયન્તે તેઽધિકારિણઃ ॥ ૫૧॥

અધમાઽજ્ઞાનભૂમિર્વૈ તમોમુખ્યા વિજૃમ્ભતે ।
તમોરજઃપ્રધાના ચ મધ્યમાઽસૌપ્રકીર્તિતા ॥ ૫૨॥

ઉત્તમાઽજ્ઞાનભૂમિશ્ચ રજઃસત્ત્વપ્રધાનિકા ।
શુદ્ધસત્ત્વવિકાશસ્ય સ્થલે નૂનં યથાક્રમમ્ ॥ ૫૩॥

પુણ્યભાજાં મનુષ્યાણાં ચિત્તાકાશે તતો દ્વિજાઃ ! ।
સપ્તાનાં જ્ઞાનભૂમીનામધિકારાઃ ક્રમેણ હિ ॥ ૫૪॥

સમુદ્યન્તિ ધ્રુવં દેવદુર્લભાનાં સ્વભાવતઃ ।
જ્ઞાનભૂમ્યશ્ચ સપ્તૈતા સાધકાન્તર્હૃદિ ક્રમાત્ ॥ ૫૫॥

શુદ્ધં સત્ત્વગુણં સમ્યગ્વર્દ્ધયન્ત્યો નિરન્તરમ્ ।
નિઃશ્રેયસપદં નિત્યં ગુણાતીતં નયન્ત્યલમ્ ॥ ૫૬॥

યત્કિઞ્ચિદાસીજ્જ્ઞાતવ્યં જ્ઞાતં સર્વં મયેતિ ધીઃ ।
આદ્યાયા ભૂમિકાયાશ્ચાનુભવઃ પરિકીર્ત્તિતઃ ॥ ૫૭॥

ત્યાજ્યં ત્યક્તં મયેત્યેવં દ્વિતીયોઽનુભવો મતઃ ।
પ્રાપ્યા શક્તિર્મયા લવ્ધાનુભવો હિ તૃતીયકઃ ॥ ૫૮॥

માયાવિલસિતં ચૈતદૃશ્યતે સર્વમેવ હિ ।
ન તત્ર મેઽભિલાષોઽસ્તિ ચતુર્થોઽનુભવો મતઃ ॥ ૫૯॥

જગદ્બ્રહ્મેત્યનુભવઃ પઞ્ચમઃ પરિકીર્ત્તિતઃ ।
બ્રહ્મૈવેદં જગત્ ષષ્ઠોઽનુભવઃ કિલ કથ્યતે ॥ ૬૦॥

અદ્વિતીયં નિર્વિકારં સચ્ચિદાનન્દરૂપકમ્ ।
બ્રહ્માઽહમસ્મીતિ મતિઃ સપ્તમોઽનુભવો મતઃ ॥ ૬૧॥

ઇમાં ભૂમિં પ્રપદ્યૈવ બ્રહ્મસારૂપ્યમાપ્યતે ।
નાત્ર કશ્ચન સન્દેહો વિદ્યતે મુનિસત્તમાઃ ! ॥ ૬૨॥

શ્રવણં મનનઞ્ચૈવ નિદિધ્યાસનમેવ ચ ।
પુરુષાર્થાસ્ત્રિધા પ્રોક્તા એત એવ મહર્ષયઃ ॥ ૬૩॥

મુમુક્ષૂણાં ત્રિભિઃ સમ્યગ્બ્રહ્મસામીપ્યલબ્ધયે ।
પુરુષાર્થૈરુપેતાનામેતૈઃ સાધનશૈલયઃ ॥ ૬૪॥

સપ્તાનાં જ્ઞાનભૂમીનાં સપ્ત સોપાનસન્નિભાઃ ।
પ્રાસાદપૃષ્ઠમારોઢું યથા સોપાનપઙ્ક્તયઃ ॥ ૬૫॥

તથા તઠસ્થજ્ઞાનસ્ય સપ્તૈતા જ્ઞાનભૂમયઃ ।
સપ્તસોપાનતુલ્યાઃ સ્યુઃ સ્વરૂપજ્ઞાનલબ્ધયે ॥ ૬૬॥

આદ્યાયાં જ્ઞાનદાનામ્ન્યાં જ્ઞાનભૂમ્માં મુમુક્ષવઃ ।
અન્તર્દૃષ્ટિં લભેરંસ્તે તત્ત્વજિજ્ઞાસવો દ્વિજાઃ ॥ ૬૭॥

તદા જિજ્ઞાસવો નૂનં પરમાણુસ્વરૂપતઃ ।

ષોડશધા વિભક્તાનિ દૃષ્ટ્વા તાન્યેવ મે પુનઃ ।
વાદસાહાય્યતો વાપિ પર્ય્યાલોચનલોચનૈઃ ॥ ૬૯॥

સૃષ્ટિં નિરીક્ષ્ય તસ્યાશ્ચ કર્તારં કેવલં હિ મામ્ ।
શક્નુવન્તિ બુધા વિપ્રાઃ ! અનુમાતું કુલાલવત્ ॥ ૭૦॥

અસ્યાઞ્ચ જ્ઞાનભૂમૌ હિ ક્ષેત્રે તત્ત્વજ્ઞમાનસે ।
આત્મજ્ઞાનીયબીજસ્ય પ્રરોહો જાયતે ધ્રુવમ્ ॥ ૭૧॥

એનાં વદન્ત્યતો ભૂમિં જ્ઞાનદાં જ્ઞાનિનો જનાઃ ।
દદાત્યેષા યતો ભૂમિર્જ્ઞાનં નિત્યં મુમુક્ષવે ॥ ૭૨॥

આરૂઢાનાં જ્ઞાનભૂમાવેતસ્યાં નિયમેન ચ ।
મમોપાસ્તૌ પ્રવૃત્તાનાં યેન કેન પ્રકારતઃ ॥ ૭૩॥

મુમુક્ષૂણાં ધ્રુવં ચિત્તે જ્ઞાનવાયુપ્રકમ્પિતમ્ ।
મૂલજ્ઞાનવૃક્ષસ્ય સર્વથા શિથિલાયતે ॥ ૭૪॥

સન્ન્યાસદાભિધાયાં હિ જ્ઞાનભૂમ્યામ્પ્રતિષ્ઠિતાઃ ।
મુમુક્ષવઃ શરીરં મે સ્થૂલમલ્પસમીપતઃ ॥ ૭૫॥

સમ્પશ્યન્તો મમાઙ્ગેષુ સ્થૂલેષ્વેવ મહર્ષયઃ ।
કુર્વન્તઃ સૂક્ષ્મશક્તીનામનભૂતિં નિરન્તરમ્ ॥ ૭૬॥

ધર્માધર્મૌ ચ નિર્ણીય હ્યધર્મં ત્યક્તુમીશતે ।
જ્ઞાનભૂમિર્દ્વિતીયાઽત એષા સન્ન્યાસદોચ્યતે ॥ ૭૭॥

યોગદાયાં તૃતીયાયાં જ્ઞાનભૂમ્યાં મુમુક્ષવઃ ।
ચિત્તવૃત્તિનિરોધસ્ય કુર્વન્તોઽભ્યાસમુત્તમમ્ ॥ ૭૮॥

મચ્છક્તિં સંયમેનૈતાં મામ્પુનર્બ્રાહ્મણોત્તમાઃ ! ।
અભ્યાસેનૈકતત્ત્વસ્ય પૃથક્ત્વેન નિરીક્ષિતુમ્ ॥ ૭૯॥

યસ્મિન્ કાલે પ્રવર્ત્તન્તે સૂક્ષ્મદૃષ્ટિસ્વરૂપકમ્ ।
સાધકેષુ તદોદેતિ પ્રત્યક્ષં નન્વલૌકિકમ્ ॥ ૮૦॥

જ્ઞાનભૂમિમિમાં વિજ્ઞા યોગદાઞ્ચ વદન્ત્યતઃ ।
ચિત્તવૃત્તિનિરોધં યદ્યોગમેષા દદાત્યલમ્ ॥ ૮૧॥

લીલોન્મુક્તિં ચતુર્થી વૈ જ્ઞાનભૂમિં પ્રપદ્ય ચ ।
અઘટ્યઘટનાયાં હિ પટીયસ્યા મુમુક્ષવઃ ॥ ૮૨॥

ત્રૈગુણ્યલીલામય્યા મે તત્ત્વમ્વૈ પ્રકૃતેર્વિદુઃ ।
તદા લીલામયી સ્વસ્યાં લીલાયાં પ્રકૃતિઃ પુનઃ ॥ ૮૩॥

નાસજ્જયિતુમીષ્ટે તાન્ સાધકાન્ વિજ્ઞસત્તમાઃ ! ।
લીલોન્મુક્તિં બુધાં પ્રોચુર્જ્ઞાનભૂમિમિમામતઃ ॥ ૮૪॥

પઞ્ચમીં જ્ઞાનભુમિં તે યદા સમ્પ્રાપ્ય સત્પદામ્ ।
અભેદ જ્ઞાનમાપ્નું વૈ ચિત્તે સ્વસ્મિન્ મુમુક્ષવઃ ॥ ૮૫॥

આરભન્તે તદા તેષામનુભૂતેર્હિ શક્તયઃ ।
વિશેષેણ વિવર્દ્ધન્ત નાત્ર કાર્યા વિચારણા ॥ ૮૬॥

અસ્ત્યેકત્વાદભેદો યો મન્મત્પ્રકૃતિગોચરઃ ।
યો વાઽભેદોઽસ્તિ મે વિપ્રાઃ ! કાર્યકારણરૂપયોઃ ॥ ૮૭॥

તં વૈજ્ઞાનિકનેત્રેણ વિસ્પષ્ટં જ્ઞાતુમીશતે ।
જ્ઞાત્વા સમ્યગ્રહસ્યઞ્ચ વિશ્વોત્પાદકકર્મણઃ ॥ ૮૮॥

જગદેવાસ્મ્યહમિતિ માં નિરીક્ષ્ય વિચારતઃ ।
કાર્યબ્રહ્મણ એતસ્ય વિબુધ્યન્તે સ્મ સત્યતામ્ ॥ ૮૯॥

એનાં વદન્તિ વિદ્વાંસો ભૂમિં વૈ સત્પદામતઃ ।
સદ્ભાવસ્ય યતોઽમુષ્યા જ્ઞાનં લોકૈરવાપ્યતે ॥ ૯૦॥

નન્વાનન્દપદાં ષષ્ઠીં જ્ઞાનભૂમિં પ્રપદ્ય વૈ ।
એકધારે તુ મય્યેવ મમ ભક્તા મુમુક્ષવઃ ॥ ૯૧॥

કર્મરાજ્યં જડં વિપ્રાઃ ! દૈવરાજ્યઞ્ચ ચેતનમ્ ।
શક્નુવન્તિ યદા દ્રષ્ટું તદા મે રસસાગરે ॥ ૯૨॥

ઉન્મજ્જન્તો નિમજ્જન્તો જગદિત્યહમેવ મામ્ ।
સમીક્ષમાણા અદ્વૈતમાનન્દમુપભુઞ્જતે ॥ ૯૩॥

બુધાઃ સમ્પ્રોચુરાનન્દપદાં ભૂમિમિમામતઃ ।
આનન્દઃ સાધકૈર્યસ્માદસ્યાં ભૂમાવવાપ્યતે ॥ ૯૪॥

અન્તિમાં જ્ઞાનભૂમિં મે સપ્તમીઞ્ચ પરાત્પરામ્ ।
સમ્પ્રાપ્ય જ્ઞાનિનો ભક્તાઃ કાર્યકારણયોર્દ્વિજાઃ ! ॥ ૯૫॥

ભેદદૃષ્ટિલયં કૃત્વા સ્વરૂપે યાન્તિ મે લયમ્ ।

ભેદજ્ઞાનલયેનૈવ તેષાં સર્વેષુ શુદ્ધાન્તરાત્મનિ ॥ ૯૬॥

સર્વેષુ પ્રાણિવૃન્દેષુ કિલૈકત્વપ્રદર્શકમ્ ।
અદ્વૈતભાવજનકાઽવિભક્તજ્ઞાનમુત્તમમ્ ॥ ૯૭॥

ઉદેતિ નાત્ર સન્દેહોઽજ્ઞાનધ્વાન્તાપનોદકમ્ ।
તદા મે જ્ઞાનિભક્તેષુ મયિ ભેદશ્ચ નશ્યતિ ॥ ૯૮॥

લીયન્તે મત્સ્રૂપે તે સ્વરૂપજ્ઞાનસંશ્રયાત્ ।
અતો વદન્તિ વિદ્વાંસ ઇમાં ભૂમિ પરાત્પરામ્ ॥ ૯૯॥

એતાસાં જ્ઞાનભૂમીનાં કેચિત્તત્ત્વબુભુત્સવઃ ।
સ્થૂલદૃષ્ટ્યા વિરોધં યચ્છઙ્કન્તે તન્ન સામ્પ્રતમ્ ॥ ૧૦૦॥

હે વિજ્ઞાનવિદો વિપ્રાઃ ! નન્વજ્ઞાનસ્ય સપ્તભિઃ ।
પ્રપૂર્ણં સપ્તભિઃ સમ્યક્ તથા જ્ઞાનસ્ય ભૂમિભિઃ ॥ ૧૦૧॥

નૂનમાસ્તે મહાકાશ-ગોલકં પરમાદ્ભુતમ્ ।
તસ્ય નિમ્નસ્તરાઃ સપ્ત સપ્તચ્છાયાપ્રપૂરિતાઃ ॥ ૧૦૨॥

ઉચ્ચૈઃ સપ્તસ્તરાઃ સપ્તજ્યોતિર્ભિશ્ચૈવ પૂરિતાઃ ।
અધઃ છાયાસ્તરાઃ સન્તિ ચત્વારો હિ સમષ્ટિતઃ ॥ ૧૦૩॥

ચતુર્ધા ભૂતસઙ્ઘાનાં ચિદાકાશેન પૂરિતાઃ ।
સ્તરા અજ્ઞાનભૂમીનાં તત ઉર્ધ્વં ગતાસ્ત્રયઃ ॥ ૧૦૪॥

જ્ઞાનભૂમિસ્તરાઃ સપ્ત તથા દશવિધાનમૂન્ ।
ધૃત્વાઽધિકારાન્ સમ્પૂર્ણાન્ પિણ્ડાન્ દૈવાંશ્ચ માનવાન્ ॥ ૧૦૫॥

વ્યાપ્નુવન્તિઃ નઃ સન્દેહસ્તસ્માદ્વિજ્ઞાનવિત્તમાઃ ! ।
એતદ્દશવિધેષ્વેવાધિકારેષ્વખિલા હિતાઃ ॥ ૧૦૬॥

નિમ્નાન્નિમ્નતરા એવમુચ્ચૈરુચ્ચતમાસ્તથા ।
દાર્શનિકાધિકારા હિ સન્તિ સમ્મિલિતા ધ્રુવમ્ ॥ ૧૦૭॥

અઘટ્યઘટનાયાં સા પ્રકૃતિર્મે પટીયસીઃ ॥

મત્તો વ્યક્તા મહાકાશ-ગોલકેઽત્ર પ્રકાશતે ॥ ૧૦૮॥

ઊર્ધ્વગાઃ સપ્તભૂમીર્વૈ સા વિદ્યારૂપતોઽશ્નુતે ।
અવિદ્યારૂપતો વિપ્રાઃ ! સપ્તભૂમીશ્ચ નિમ્નગાઃ ॥ ૧૦૯॥

સપ્તચ્છાયાભિરેતાભિર્જ્યોતિર્ભિઃ સપ્તભિસ્તથા ।
પરિપૂર્ણં મહાકાશ-ગોલકં મે જડાત્મિકા ॥ ૧૧૦॥

વિભક્તિ પ્રકતિર્નિત્યં નૂનમાધારરૂપતઃ ।
અહં તસ્યોપરિષ્ઠાચ્ચ સન્તિષ્ઠે શુદ્ધચિન્મયઃ ॥ ૧૧૧॥

જ્ઞાનિનઃ સ્યાદ્ધિ યસ્યાદોઽધ્યાત્યગોલકદર્શનમ્ ।
મદ્દર્શનં ધ્રુવં કર્તું શક્નુયાત્સર્વથૈવ સઃ ॥ ૧૧૨॥

વૈદિકૈર્દર્શનૈરુક્તં જ્ઞાનમેવાસ્તિ લોચનમ્ ।
એતદર્થં ન સન્દેહઃ સત્યં સત્યં બ્રવીમિ વઃ ॥ ૧૧૩॥

સપ્તાનાં જ્ઞાનભૂમીનામતો દર્શનસપ્તકે ।
વિરોધં યેઽનુકલ્પન્તે તે ભક્તા જ્ઞાનિનો ન મે ॥ ૧૧૪॥

જ્ઞાનિભક્તા ભવન્તો મે ભવન્તો મે દ્વિજોત્તમાઃ ! ।
અદ્વૈતમવિભક્તઞ્ચ વિકારરહિતં તથા ॥ ૧૧૫॥

જ્ઞાનં પ્રાપ્ય પરાસિદ્ધેઃ કૃપાદૃષ્ટ્યાનુતોષિતાઃ ।
મત્સાયુજ્યં સમાસાદ્ય લભેરન્ કૃતકૃત્યતામ્ ॥ ૧૧૬॥

ઇતિ શ્રીધીશગીતાતૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે
ધીશર્ષિસંવાદે જ્ઞાનભૂમિનિરૂપણં નામ તૃતીયોઽધ્યાયઃ ।

## ૪. ધર્મવિજ્ઞાનનિરૂપણમ્

અથ ચતુર્થોઽધ્યાયઃ ।
ઋષય ઊચુઃ ॥ ૧॥

રહસ્યં જ્ઞાનભૂમીનાં હે સર્વજ્ઞ ! મહાદ્ભુતમ્ ।
તથાઽવિભક્તજ્ઞાનસ્ય શૈલીં શ્રુત્વા પ્રકાશિકામ્ ॥ ૨॥

અસ્માકં સંશયાઃ સર્વે દૂરીભૂતા ન સંશયઃ ।
અસ્માનુપદિશૈતચ્ચ કૃપાં કૃત્વાઽધુના પ્રભો ! ॥ ૩॥

કો નન્વજ્ઞાનભૂમીનાં પ્રભાવાદ્રક્ષયન્ મુદા ।
મુમુક્ષૂન્ સાધકાઞ્જીવાન્નયતે જ્ઞાનભૂમિકાઃ ॥ ૪॥

અતીત્યાજ્ઞાનભૂમીશ્ચ કૈરુપાયૈર્મુમુક્ષવઃ ।
લભન્તે જ્ઞાનભૂમીર્હિ સાધકાઃ સત્ત્વરં ધ્રુવમ્ ॥ ૫॥

ક્રમાદગ્રેસરન્તશ્ચ સમસ્તુ જ્ઞાનભૂમિષુ ।
ભવન્તં પ્રાપ્નુવન્ત્યન્તે સચ્ચિદાનન્દરૂપિણમ્ ॥ ૬॥

ગણપતિરુવાચ ॥ ૭॥

બ્રાહ્મણાઃ ! નયતે નૂનં સર્વલોકહિતપ્રદઃ ।
બ્રહ્માણ્ડપિણ્ડરૂપાયાઃ સૃષ્ટેશ્ચ ધારકો મહાન્ ॥ ૮॥

માનવાન્ ધર્મ એવાયં કૈવલ્યાભ્યુદયપ્રદઃ ।
સંરક્ષ્યાજ્ઞાનભૂમિભ્યો જ્ઞાનભૂમીર્નિરન્તરમ્ ॥ ૯॥

દદચ્ચાભ્યુદયં સમ્યક્ સમ્પ્રાપય્યાન્તિમાં ક્રમાત્ ।
જ્ઞાનભૂમિં તતો દત્તે નિઃશ્રેયસમહો પરમ્ ॥ ૧૦॥

અહમેવાસ્મિ ધર્મસ્ય સ્થિતિસ્થાનં દ્વિજર્ષભાઃ ! ।
ધર્માકૃતિર્મમૈવાસ્તે શક્તિરેવ સનાતની ॥ ૧૧॥

વિરાદસૃષ્ટેઃ પ્રવાહસ્ય ધારણં કૃતવત્યહો ।
મમૈવ સાત્ત્વિકી શક્તિર્નૂનં ધર્મો મહર્ષયઃ ! ॥ ૧૨॥

નાત્ર કશ્ચન સન્દેહો વિદ્યતે દ્વિજસત્તમાઃ ! ।
વિદ્યતે વિપ્રશાર્દૂલાઃ ! શક્તિર્મે ત્રિગુણાત્મિકા ॥ ૧૩॥

આકર્ષણવિશિષ્ટા યા સા શક્તીરાજસી મતા ।
વિકર્ષણેન સમ્પૃક્તા શક્તિર્મે તામસી તથા ॥ ૧૪॥

સામઞ્જસ્યં પ્રકુર્વાણા તયોઃ શક્ત્યોર્દ્વયોરિહ ।
સાત્ત્વિકી સૈવ ધર્મોઽસ્તિ શક્તિર્મે નાત્ર સંશયઃ ॥ ૧૫॥

પરિવ્યાપ્નોતિ ધર્મસ્યશક્તિરેષૈવ ધારિકા ।
પરમાણુભ્ય આ નૂનં પૂર્ણાં બ્રહ્માણ્ડવિસ્તૃતિમ્ ॥ ૧૬॥

શક્તેઃ સન્ધારિકાયા મે ધર્મસ્યૈવ પ્રભાવતઃ ।
સૂર્યેન્દ્વાદિગ્રહાઃ સર્વે તથા નક્ષત્રમણ્ડલમ્ ॥ ૧૭॥

ઉપગ્રહાદયોઽપ્યેવં વિરાડ્દેહે મમાનિશમ્ ।
સ્વસ્વકક્ષામુપાશ્રિત્ય ભ્રમન્તે હિ સમન્તતઃ ॥ ૧૮॥

સૃષ્ટેરક્ષાઞ્ચ કુર્વન્તિ સાહાય્યં દદતો મિથઃ ।
દેવાસુરેણ યુદ્ધેન દૈવ્યાઃ સૃષ્ટેઃ પવિત્રતામ્ ॥ ૧૯॥

સમ્પાદયન્તી ધર્મ્યસ્ય ધારિકા શક્તિરુત્તમા ।
પ્રતિષ્ઠાપયતે દેવાન્ સ્વસ્વલોકેઽસુરાંસ્તથા ॥ ૨૦॥

નિશ્ચિતં માતૃભાવેન વિજ્ઞાઃ ! ધર્મમયેણ મે ।
પ્રકૃતેઃ પાલિતા જીવાઃ પોષિતાશ્ચ નિરન્તરમ્ ॥ ૨૧॥

ઉદ્ભિજ્જાત્સ્વેદજં ગત્વા સ્વેદજાદણ્ડજં તથા ।
તતો ગચ્છન્ત્યહો વિપ્રાઃ ! અણ્ડજાચ્ચ જરાયુજમ્ ॥ ૨૨॥

જરાયુજાયોનિતો હિ મર્ત્યયોનિં ગતાઃ પુનઃ ।
ભવન્તિ મોક્ષમાર્ગસ્ય નૂનમેતેઽધિકારિણઃ ॥ ૨૩॥

જ્ઞાનં હિ, ધર્માધર્મસ્ય માનવેભ્યો હિ કેવલમ્ ।
કૃતાસ્તે મોક્ષમાર્ગસ્ય પથિકા દદતા મયા ॥ ૨૪॥

ધારિકા શક્તિરેવાસ ધર્મસ્ય વિપ્રપુઙ્ગવાઃ ! ॥

ક્રમાદુન્નમયન્તી વ માનવાનુત્તરોત્તરમ્ ॥ ૨૫॥

કૃત્વાઽધિકારિણો જ્ઞાનભૂમેરન્તે ચ તાનહો ।
કૈવલ્યપદવીં તેભ્યઃ પ્રદત્તે ચ શનૈઃ શનૈઃ ॥ ૨૬॥

સર્વેષાં રક્ષકો ધર્મઃ સર્વજીવહિતપ્રદઃ ।
નિખિલવ્યાપકશ્ચાસ્તિ સર્વેભ્યોઽભ્યુદયપ્રદઃ ॥ ૨૭॥

સર્વેષાં માનસે નૂનં મત્સ્વરૂપપ્રકાશકઃ ।
સાધકાનાં હિ જીવાનાં શિવત્વસ્ય વિધાયકઃ ॥ ૨૮॥

ધર્મોઽયં બ્રાહ્મણાઃ ! પ્રોક્તઃ સાર્વભૌમસ્વરૂપભાક્ ।
સાધારણવિશેષાભ્યાં દ્વિધા ભિન્નો ન સંશયઃ ॥ ૨૯॥

સાધારણસ્તયોર્ધર્મઃ સર્વજીવહિતે રતઃ ।
અધિકારવિશેષસ્ય જીવાનાં કેન્દ્રભાગિનામ્ ॥ ૩૦॥

વિશેષસ્તુ વિશેષેણ હિતં સમ્પાદયત્યલમ્ ।
સાધારણસ્ય ધર્મસ્ય વર્ણયેઽઙ્ગાનિ સામ્પ્રતમ્ ॥ ૩૧॥

આકર્ણ્યન્તાં ભવદ્ભિશ્ચ સાવધાનેન ચેતસા ।
ચતુર્વિંશતિતત્ત્વાનાં નૂનં સન્ત્યનુરૂપતઃ ॥ ૩૨॥

અઙ્ગાનિ પૂર્ણધર્મ્યસ્ય ચતુર્વિંશતિરેવ ભોઃ ! ।

દાનં હિ ત્રિવિધં પ્રોક્તં વિદ્યાર્થાભયભેદતઃ ॥ ૩૩॥

કાયિકં વાચિકઞ્ચૈવ તથા માનસમેવ ચ ।
તપોઽપિ ત્રિવિધઃ પ્રોક્તં તપોવિદ્ભિર્મહાત્મભિઃ ॥ ૩૪॥

ષડ્વિધઃ કર્મયજ્ઞોઽસ્તિ નિત્યો નૈમિત્તિકસ્તથા ।
કામ્યોઽધ્યાત્મોઽધિદૈવશ્ચ ષષ્ઠશ્ચૈવાધિભૌતિકઃ ॥ ૩૫॥

ઉપાસ્તિયજ્ઞભેદાશ્ચ વિદ્યન્તે નવધા નનુ ।
તે સર્વે ભક્તિમૂલાઃ સ્યુર્યોગમૂલાસ્તથૈવ ચ ॥ ૩૬॥

ઉપાસ્તેરસ્તિ યૌગો હિ સ્થૂલો દેહો ન સંશયઃ ।
તસ્યાશ્ચૈવ દ્વિજાઃ ! જ્ઞેયા ભક્તિઃ પ્રાણસ્વરૂપિણી ॥ ૩૭॥

મન્ત્રો હઠો લયો રાજ ઇતિ ભેદાચ્ચતુર્વિધાત્ ।
ચતુર્ધોપાસાના વેદ્યા નૂનં યોગવિચારતઃ ॥ ૩૮॥

તથા ભક્તિપ્રભેદેન પઞ્ચધોપાસનાસ્ત્યહો ।
રાગદ્વેષાદિસઞ્જુષ્ટા ભક્તા મેઽશુચયો દ્વિજાઃ ! ॥ ૩૯॥

માં સદોપાસતે મૂઢા આસુરીષ્વેવ શક્તિષુ ।
સકામાઃ ફલમિચ્છન્તઃ શુભં ભવતગણા મમ ॥ ૪૦॥

મામેવોપાસતે શશ્વન્નૂનં દૈવીષુ શક્તિષુ ।
વિષયાનન્દ એવાહો બ્રહ્માનન્દાનુભાવકાઃ ॥ ૪૧॥

સ્વભાવાદેવ જાયન્તે ભક્તવૃન્દા મમોન્નતાઃ ।
મલ્લીલાવિગ્રહોપાસ્તૌ રતાત્માનો ન સંશયઃ ॥ ૪૨॥

ભક્તા મે જ્ઞાનિનો રૂપે સગુણે નિગુરો તથા ।
મામુપાસ્ય નિમજ્જન્તિ પરમાનન્દસાગરે ॥ ૪૩॥

શ્રવણં મનનઞ્ચૈવ નિદિધ્યાસનમેવ ચ ।
જ્ઞાનયજ્ઞસ્ય ભેદાઃ સ્યુસ્ત્રિવિધા હિ મહર્ષયઃ ! ॥ ૪૪॥

ચતુર્વિંશતિરેતાનિ ધર્મસ્ય પ્રાકૃતાન્યહો ।
અઙ્ગાનિ સર્વજીવાનાં સાધકાનિ હિતસ્ય નુ ॥ ૪૫॥

વિભિન્ન રુચયો લોકા નાનાશક્તિમયા યતઃ ।
અતઃ સાધારણો ધર્મઃ સર્વપ્રાણિહિતાવહઃ ॥ ૪૬॥

અઙ્ગઃ પૂર્ણસ્ય ધર્મસ્ય ચતુર્વિંશતિઃ ।
સ્વરૂપં ચેદ્વિજાનીયુઃ સર્વલોકહિતાલયમ્ ॥ ૪૭॥

ધર્મજિજ્ઞાસવો નૂનમુદારહૃદયાસ્તદા ।
શ્રીગુરોઃ પદવીં પૂજ્યાં પ્રાપ્નુયુઃ સર્વપ્રાણિનામ્ ॥ ૪૮॥

યાવન્તો ધર્મમાર્ગો વૈ જનિષ્યન્તે યુગે યુગે ।
સાધારણસ્ય ધર્મસ્ય કિયન્ત્યઙ્ગાન્યમીષુ તે ॥ ૪૯॥

ગૃહીત્વૈવ પ્રયાસ્યન્તિ કૃતાર્થત્વમસંશયમ્ ।
પ્રાદુર્ભૂતાશ્ચ યે લોકે ધર્મમાર્ગા દ્વિજોત્તમાઃ ! ॥ ૫૦॥

અધુનાવધિ તેઽપ્યેવં કૃતાર્થસ્વં ગતા ધ્રુવમ્ ।
નાત્ર કશ્ચન સન્દેહો વિદ્યતે વિપ્રપુઙ્ગવાઃ ! ॥ ૫૧॥

પ્રપૂર્ણત્વં હિ ધર્મસ્ય શાશ્વતસ્યેદમેવ નુ ।
એતદેવ મહત્ત્વશ્ચ પિતૃભાવોઽપ્યયં ધ્રુવમ્ ॥ ૫૨॥

અન્યધર્માન્ન યો દ્વેષ્ટિ વાધતે વા કદાચન ।
યથાયોગ્યન્તુ સર્વેભ્યો દ્વિવિધાઽભ્યુદયપ્રદઃ ॥ ૫૩॥

નિઃશ્રેયસસ્ય ચાઽધ્વાનં યસ્તુ દર્શયતેઽખિલાન્ ।
ધર્મઃ સનાતનો નૂનમિયં હ્યૂપનિષન્મતા ॥ ૫૪॥

વિપ્રાઃ ! વિશેષધર્મસ્ય સ્વરૂપં મહદદ્ભુતમ્ ।
યથા વર્ણાશ્રમો ધર્મ આર્યજાતેઃ શુભાવહઃ ॥ ૫૫॥

અનાર્યજાતિજાતાનાં ન તથાસ્ત્યુપયોગભાક્ ।
અતોઽયં વર્ત્તતે ધર્મો વિશેષો નાત્ર સંશયઃ ॥ ૫૬॥

પ્રવૃત્તિરોધકો નૂનં વર્ણધર્મો મહર્ષયઃ ! ।
નિવૃત્તેઃ પોષકશ્ચાસ્તિ ધર્મ આશ્રમગોચરઃ ॥ ૫૭॥

ધર્માવેતાવુભાવેન સઞ્જીવ્ય શાશ્વતીઃ સમાઃ ।
આર્યજાતિં સુરક્ષેતાં સાઙ્કુર્યાત્ પતનાત્તથા ॥ ૫૮॥

નારીધર્મસ્તપોમૂલો નૃધર્મો યજ્ઞમૂલકઃ ।
એતૌ દ્વાવપિ વર્ત્તતે ધર્મો વિપ્રાઃ ! વિશેષકૌ ॥ ૫૯॥

પ્રવૃત્તિધર્મ એકોઽસ્તિ નિવૃત્તિધર્મ ઇત્યપિ ।
રાજધર્મઃ પ્રજાજમ્મઃ શાક્તઃ શૈવશ્ચ વૈષ્ણવઃ ॥ ૬૦॥

સૌર્યો ધર્મોઽપિ ભો વિપ્રાઃ ! આપદ્ધર્માદયસ્તથા ।
એતે વિશેષધર્મસ્ય વિદ્યન્તેઽન્તર્ગતાઃ ખલુ ॥ ૬૧॥

સર્વપ્રધાન આદ્યશ્ચ વરીયાન્ વ્યાપકસ્તથા ।
સદાચારો વિશેષેષુ ધર્મેષુ વિદ્યતે દ્વિજાઃ ! ॥ ૬૨॥

યતો ધર્માનુકૂલો યો વ્યાપારો વપુષોઽખિલઃ ।
સદ્ભિઃ પ્રોક્તઃ સદાચારો નન્વસૌ પુણ્યવર્દ્ધનઃ ॥ ૬૩॥

આસ્તે વિશેષધર્મસ્ય હ્યધિકારોઽન્તિમો દ્વિજાઃ ! ।
સન્ન્યાસાશ્રમ એવાસૌ નાત્ર કાર્યા વિચારણા ॥ ૬૪॥

સન્ન્યાસો ન ભવેદ્વિજ્ઞાઃ ! કર્મત્યાગેન કેવલમ્ ।
કિન્તુ સન્ન્યાસસંસિદ્ધિર્વાસનાત્યાગતો ભવેત્ ॥ ૬૫॥

અતો વિશેષધર્મસ્યાધિકારસ્યાતિવિસ્તૃતેઃ ।
વૈચિત્ર્યાચ્ચ પરાત્સ્થૂલસ્વાઙ્ગસઞ્ચાલનાત્મિકામ્ ॥ ૬૬॥

સદાચારમયીં સ્થૂલસ્થૂલામારભ્ય સત્ક્રિયામ્ ।
સૂક્ષ્મસૂક્ષ્મતમબ્રહ્મસદ્ભાવપ્રાપ્તિકારણમ્ ॥ ૬૭॥

પરિવ્યાપ્ય ચ સન્ન્યાસં સમ્બન્ધસ્તસ્ય વિદ્યતે ।
નાત્ર કશ્ચન સન્દેહો વિદ્યતે બ્રાહ્મણોત્તમાઃ ! ॥ ૬૮॥

વર્ણાશ્રમાદિધર્માણાં વિશેષાણાં દ્વિજોત્તમાઃ ! ।
પાલનેનૈવ મે ભક્તાઃ ક્રમશોઽજ્ઞાનભૂમિતઃ ॥ ૬૯॥

નિવૃત્ય જ્ઞાનભૂમીનાં જાયન્તે પથિકા ધ્રુવમ્ ।
સાધારણસ્ય ધર્મ્યસ્ય સાધકાઃ ક્રમશો વરમ્ ॥ ૭૦॥

સાર્વભૌમં સ્વરૂપં વૈ સર્વજીવહિતપ્રદમ્ ।
સર્વશક્તિમયં દિવ્યં વ્યાપકં મોક્ષસાધકમ્ ॥ ૭૧॥

પ્રાણિનોઽનુભવન્ત્યત્ર યાવદેવ દ્વિજોત્તમાઃ ! ।
જ્ઞાનસ્ય તાવતી ભૂમિમારોહન્તિ સમુન્નતામ્ ॥ ૭૨॥

શ્રેષ્ઠં વેદાન્તસિદ્ધાન્તાનુભવં પ્રાપ્ય સત્વરમ્ ।
મત્સાયુજ્યં લભન્તેઽન્તે તતો યાન્તિ કૃતાર્થતામ્ ॥ ૭૩॥

ઇતિ શ્રીધીશગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે

ધીશર્ષિસંવાદે ધર્મવિજ્ઞાનનિરૂપણં નામ ચતુર્થોઽધ્યાયઃ ।

## ૫. વેદાન્તનિરૂપણમ્

અથ પઞ્ચમોઽધ્યાયઃ ।

ઋષય ઊચુઃ ॥ ૧॥

જગદ્ગુરો ! આદિગુરો ! પૂજ્ય ! વેદાન્તકૃદ્વિભો ! ।
ભવદ્દયોદયાદેવ પ્રાપ્તવન્તો વયં શ્રુતીઃ ॥ ૨॥

દેવાપારકૃપાસિન્ધોશ્ચલદ્વીચેસ્તટાશ્રયાત્ ।
શ્રુતવન્તો રહસ્યાનિ ત્વત્તોઽનેકાનિ સામ્પ્રતમ્ ॥ ૩॥

તત્કૃતાર્થીભવન્તોઽદ્ય તદેવ પ્રાર્થયામહે ।
જ્ઞાનરત્નાબ્ધિવેદેષુ યદ્વેદાન્તં પ્રચક્ષતે ॥ ૪॥

તસ્ય સર્વોત્તમં તત્ત્વજ્ઞાનમસ્માનુપાદિશ ।
વયં યેન પરાં શાન્તિમાપ્નુયામઃ સુનિશ્ચિતમ્ ॥ ૫॥

ગણપતિરુવાચ ॥ ૬॥

સર્વોપનિષદાં સારઃ પીયૂષં વેદવારિધેઃ ।
વિજ્ઞાઃ ! વેદાન્તયોગોઽયમિદાનીં વર્ણ્યતે મયા ॥ ૭॥

મનનાચ્છ્રવણાદ્યસ્ય નિદિધ્યાસનતસ્તથા ।
ત્રિતાપતો વિનિર્મુક્તાસ્તત્ત્વજ્ઞાનાબ્ધિપારગાઃ ॥ ૮॥

ક્ષમન્તેઽવ્યયમાત્માનં સાક્ષાત્કર્તું મુમુક્ષવઃ ।
નાત્ર કશ્ચન સન્દેહઃ કર્તવ્યો વિપ્રપુઙ્ગવાઃ ॥ ૯॥

સ્વભાવજસ્ય પ્રકૃતેઃ કર્મણઃ સહજસ્ય મે ।
પાશસઙ્ગાદવિદ્યાયા અનાદ્યાયાઃ પ્રભાવતઃ ॥ ૧૦॥

આવિર્ભવતિ જીવત્વં ચિજ્જડગ્રન્થિરૂપકમ્ ।
અવિદ્યેયમનાદ્યાઽસ્તિ જીવભાવપ્રકાશિની ॥ ૧૧॥

ત્રિગુણાત્મપ્રકૃત્યાશ્ચ લૌલ્યાત્સ્વાભાવિકાદ્બુધાઃ ! ।
નૂનં કર્મપ્રવાહોઽયમનાદિર્વિદ્યતે ખલુ ॥ ૧૨॥

યતોઽસ્તિ સહજં કર્મ કથિતં પાશસન્નિભમ્ ।
મત્પ્રકત્યાઃ સ્વભાવેન સહજાતં ન સંશયઃ ॥ ૧૩॥

ભૂતભાવોદ્ભવકરાદ્વિસર્ગાત્સહજાદલમ્ ।
ચતુર્ધા ભૂતસઙ્ઘોઽયં જાયતે કર્મણઃ સ્વતઃ ॥ ૧૪॥

અનાદ્યાયા અવિદ્યાયાઃ પ્રભાવેણ મહર્ષયઃ ! ।
જાયતે ચિજ્જડગ્રન્થિર્દૃઢોઽજ્ઞાનમયો હિ યઃ ॥ ૧૫॥

જીવભાવઃ સ એવાસ્તિ સંસારાવર્ત્તપાતકઃ ।
અવિદ્યોપહિતં વિપ્રાઃ ! ચૈતન્યં પ્રકૃતેર્મમ ॥ ૧૬॥

સત્સત્તાયાઃ પ્રભાવેણ વ્યષ્ટ્યહઙ્કારઘૂર્ણિતમ્ ।
દ્વૈતસ્યોદ્બોધકં વિજ્ઞાઃ ! જીવભાવં પ્રપદ્યતે ॥ ૧૭॥

પુનર્મે જ્ઞાનિનો ભક્તા વિદ્યાસાહાય્યતો દ્વિજાઃ ! ।
પ્રાપ્ય નિત્યસ્થિતં મોક્ષં વિલીયન્તે ધ્રુવં મયિ ॥ ૧૮॥

અવિદ્યાયા દૃઢં જાલં કર્મબન્ધઞ્ચ દુર્દ્દમમ્ ॥

મમ વિપ્રાઃ ! પ્રભાવેણ મદ્ભક્તા અતિયન્ત્યહો ॥ ૧૯॥

યતસ્ત્રૈગુણ્યમય્યાસ્તે પ્રકર્તિમમ તામતઃ ।
સ્વભાવેનોપતિષ્ઠન્તે રજઃસત્ત્વમોગુણાઃ ॥ ૨૦॥

ઉત્પત્તિં રજસા વિપ્રાઃ ! સ્થિતિં સત્ત્વેન સન્તતમ્ ।
તમોગુણેન સંહારં કરોતિ પ્રકૃતિઃ સ્વતઃ ॥ ૨૧॥

અસ્મિન્ સ્વભાવસિદ્ધેઽપિ પ્રકૃતેર્મે ગુણત્રયે ।
ઉભાવેવ પ્રધાનૌ સ્તસ્તમઃસત્ત્વાભિધાનકૌ ॥ ૨૨॥

પ્રવૃત્તિપરકત્વેન સૃષ્ટિકારિતયા તથા ।
રજસ્તુ કેવલં જ્ઞેયં તમઃસત્ત્વસહાયકમ્ ॥ ૨૩॥

અતસ્તમોમયી વિપ્રાઃ ! યદાસ્તે પ્રકૃતિર્મમ ।
વિદ્યાવિદ્યાપ્રભેદજ્ઞૈરવિદ્યા સોચ્યતે તદા ॥ ૨૪॥

પ્રકૃતિર્મે યદા ત્વેષા શુદ્ધા સત્વમયી ભવેત્ ।
નામ્ના વિદ્યા તદા લોકે તત્ત્વજ્ઞૈરભિધીયતે ॥ ૨૫॥

પરિણામો ભવેત્ સત્ત્વે તમસો નાત્ર સંશયઃ ।
સત્ત્વસ્યાપિ ભવેન્નૂનં પરિણામસ્તમસ્યહો ॥ ૨૬॥

રજોગુણો યતો નૂનં સાહાય્યં કુરુતે દ્વયોઃ ।
સ્વભાવાત્મકૃતિર્મેઽસ્તિ યતશ્ચ પરિણામિની ॥ ૨૭॥

અતઃ સ્વભાવસિદ્ધોઽયં પરિણામો મિથસ્તયોઃ ।
મહર્ષયઃ ! ન ચૈવાયં સિદ્ધાન્તો વિસ્મયાવહઃ ॥ ૨૮॥

સ્વતઃ પૂર્ણે યદા સત્ત્વપરિણામસ્તમોગુણે ।
જાયતે ચિજ્જડગ્રન્થિસ્તત્રૈવોત્પદ્ય પ્રસ્ફુટમ્ ॥ ૨૯॥

પ્રકાશભાવમાપન્નઃ પરમાણૌ જડાત્મકે ।
ઉત્પાદયતિ જીવત્વં સાક્ષાત્પ્રામાણ્યબોધકમ્ ॥ ૩૦॥

સા ચૈતન્યમયી સત્તા ચિજ્જડગ્રન્થિરૂપિણી ।
ક્રમાદ્વિકાશમાપન્નોદ્ભિજ્જયોનૌ મહર્ષયઃ ! ॥ ૩૧॥

પ્રાપ્ય સ્વેદજયોનિ તામાણ્ડજીં યોનિમાશ્રિતા ।
એત્ય જરાયુજીં યોનિં મર્ત્યયોનિં પ્રપદ્યતે ॥ ૩૨॥

તત્ર સત્ત્વપ્રપૂર્ણત્વાશ્રયેણ પ્રકૃતેર્મમ ।
કૃપાં વિદ્યાસ્વરૂપાયા પ્રાપ્તા સ્વં રૂપમશ્નુતે ॥ ૩૩॥

એતદ્વો વર્ણિતં વિજ્ઞાઃ રહસ્યં ગૂઢમદ્ભુતમ્ ।
ઉત્પત્તેરપિ મોક્ષસ્ય જીવાનાં નુ મહર્ષયઃ ! ॥ ૩૪॥

વર્ત્તતે ગુપ્તમેતદ્ધિ સર્વાસૂપનિષત્સ્વપિ ।
ન પ્રાપ્તું કોઽપિ શક્નોતિ શ્રીગુરોઃ કૃપયા વિના ॥ ૩૫॥

અઘટ્યઘટનાયાં યા પ્રકૃતિ પટીયસી ।
સાસ્ત્યવિદ્યા સ્વરૂપેણ જીવબન્ધનકારિણી ॥ ૩૬॥

પુનઃ સત્ત્વમયી સૈવ વિદ્યારૂપસ્ય ધારિણી ।
દદાતિ જીવવર્ગેભ્યઃ કૈવલ્યપદમુત્તમમ્ ॥ ૩૭॥

નોપાસતેઽથ યે જીવા વિદ્યાં સ્વાધીનતાં ગતાઃ ।
તે જીવા નિશ્ચિતં વિપ્રાઃ ! અવિદ્યાચ્છન્નમાનસાઃ ॥ ૩૮॥

ત્રૈગુણ્યપરિણામસ્ય ચક્રેઽસ્મિઞ્છાશ્વતીઃ સમાઃ ।
તાપત્રયં સુભુઞ્જાના નિતરાં પ્રભ્રમન્ત્યહી ॥ ૩૯॥

વિશિષ્ટૈર્લક્ષણૈઃ સત્તાઽનુભૂતિં બ્રહ્મજીવયોઃ ।
માયાપ્રપઞ્ચરુપાયાઃ સૃષ્ટેશ્ચૈવ દ્વિજર્ષભાઃ ! ॥ ૪૦॥

રહસ્યં વર્ણયામ્યેતત્ સાવધાનૈર્નિશમ્યતામ્ ।
યેન સમ્યગ્ભવેજ્જ્ઞાનં ભવતાં બ્રહ્મજીવયોઃ ॥ ૪૧॥

કારણસ્થૂલસૂક્ષ્મેભ્યઃ શરીરેભ્યો બહિર્ગતમ્ ।
અતીતં પઞ્ચકોશેભ્યો હ્યવસ્થાત્રયસાક્ષિકમ્ ॥ ૪૨॥

ચતુર્વિંશતિતત્ત્વાનાં યદાધારસ્વરૂપકમ્ ।
દ્વાભ્યાં પ્રતીમાનાભ્યાં માયાઽવિદ્યાસ્વરૂપિણા ॥ ૪૩॥

ઉપાધિનેશજીવાભ્યાં ભિન્નં યચ્ચ મહર્ષયઃ ! ।
સચ્ચિદાનન્દરૂપં તદ્બ્રહ્મ સમ્પ્રોચ્યતે બુધૈઃ ॥ ૪૪॥

એતાનિ લક્ષણાનીહ વર્ણયામિ યથાક્રમમ્ ।
સામ્પ્રતં સાવધાનૈશ્ચ શ્રૂયન્તાં તત્ત્વવેદિનઃ ! ॥ ૪૫॥

પઞ્ચભિર્યન્મહાભૂતૈઃ કૃતં પઞ્ચીકૃતૈર્નનુ ।
સુખદુઃખાદિભોગાનાં સ્થાનં વિપ્રાશ્ચ કર્મજમ્ ॥ ૪૬॥

જાયતે વર્દ્ધતેઽસ્ત્યેવં ક્ષીયતે પરિણમ્યતે ।
વિનશ્યતીતિ ષડ્ભાવવિકારૈશ્ચ સમન્વિતમ્ ॥ ૪૭॥

સ્થૂલં હિ તચ્છરીરં સ્યાત્સર્વથા ક્ષણભઙ્ગુરમ્ ।
લક્ષણં સ્થૂલકાયસ્ય વિત્તૈતદ્વિશદં દ્વિજાઃ ! ॥ ૪૮॥

યદપઞ્ચીકૃતૈઃ પઞ્ચમહાભૂતૈઃ કૃતં કિલ ।
કર્મજં સુખદુઃખાદિભોગસાધનરૂપકમ્ ॥ ૪૯॥

પઞ્ચજ્ઞાનેન્દ્રિયૈર્વિપ્રાઃ ! પઞ્ચકર્મેન્દ્રિયૈસ્તથા ।
પઞ્ચપ્રાણૈસ્તથૈકેન મનસા બુદ્ધિસઞ્જુષા ॥ ૫૦॥

યત્સપ્તદશભિશ્ચૈવં કલાભિઃ સહ તિષ્ઠતિ ।
તદ્ધિ સૂક્ષ્મં શરીરં સ્યાત્સ્સૂક્ષ્મતત્ત્વવિનિર્મિતમ્ ॥ ૫૧॥

વિજ્ઞાઃ ! યદસ્ત્યનિર્વાચ્યયાઽનાદ્યવિદ્યાસ્વરૂપકમ્ ।
કારણં હ્યેકમાત્રઞ્ચ સ્થૂલસૂક્ષ્મશરીરયોઃ ॥ ૫૨॥

સ્વસ્વરૂપાજ્ઞાનરૂપં નિર્વિકલ્પકરૂપકમ્ ।
તત્કારણશરીરં સ્યાજ્જીવત્વપ્રતિપાદકમ્ ॥ ૫૩॥

જીવાનાદિપ્રવાહસ્ય જીવસૃષ્ટેઃ પૃથક્ પૃથક્ ।

યા પ્રારમ્ભક્ષણે વિપ્રાઃ ! ચિજ્જડગ્રન્થિવન્ધિની ॥ ૫૪॥

જાયતે પ્રથમાવસ્થા તચ્છરીરં હિ કારણમ્ ।
સંસ્કારઃ સૂક્ષ્મદેહસ્યાઽનુક્ષણં પરિવર્ત્તતે ॥ ૫૫॥

ધ્રિયન્તેઽતો ધ્રુવં જીવૈઃ સ્વસંસ્કારાનુસારતઃ ।
નાનાવિચિત્રતોપેતાઃ સ્થૂલદેહાઃ પૃથક્ પૃથક્ ॥ ૫૬॥

પરન્ત્વનાદ્યવિદ્યૈક મૂલિકા સર્વથા દ્વિજાઃ ! ।
યા શરીરદ્વયસ્યાપિ મૂલકારણરૂપિણી ॥ ૫૭॥

દશા વિકારહીનાઽસ્તિ ચિદાત્માવરણક્ષમા ।
તત્કારણ શરીરમ્વા બ્રુવન્તિ તદ્વિદો જનાઃ ॥ ૫૮॥

વિપ્રાઃ ! અન્નમયઃ પ્રાણમય એવં મનોમયઃ ।
દ્વૌ વિજ્ઞાનમયાનન્દમયૌ કોશૌ તથૈવ ચ ॥ ૫૯॥

કોશપઞ્ચકમેવૈતદાત્માવરણકારકમ્ ।
વિદ્યતે નિતરાં વિજ્ઞાઃ ! નાત્ર કોપ્યસ્તિ સંશયઃ ॥ ૬૦॥

આચ્છાદનં તથા ત્વક ચ વિપ્રાઃ ! આવરણાદયઃ ।
કોશશબ્દેન ગૃહ્યન્તે યે ચાન્યે વા તદર્થકાઃ ॥ ૬૧॥

એકામુપર્ય્યુપર્યેકા પલાણ્ડુત્વગ્યથા ભવેત્ ।
પઞ્ચ કોશાસ્તથા જ્ઞેયા જીવદેહેષુ નિશ્ચિતમ્ ॥ ૬૨॥

સ્યાદાનન્દમયઃ કોશઃ પ્રથમં તદનન્તરમ્ ।
વિજ્ઞાનમયનામાસ્તિ તત્પરશ્ચ મનોમયઃ ॥ ૬૩॥

તતઃ પ્રાણમયઃ કોશો વર્ત્તતે વિપ્રપુઙ્ગવાઃ ।
સર્વોપર્ય્યસ્તિ કોશસ્તુ નૂનમન્નમયાભિધઃ ॥ ૬૪॥

જાયતેઽન્નરસાદેવ યસ્તેનૈવાભિવર્દ્ધતે ।
યશ્ચાઽન્નરસમય્યાં હિ ક્ષિત્યામન્તે વિલીયતે ॥ ૬૫॥

એષોઽસ્ત્યન્નમયઃ કોષઃ સ્થૂલદેહાપરાભિધઃ ।
લક્ષણં સૂક્ષ્મદેહસ્ય શ્રૂયતાં મુનિપુઙ્ગવા ! ॥ ૬૬॥

સ્યાન્મનઃપ્રાણ વિજ્ઞાનમયૈઃ કોશૈર્મહર્ષયઃ ! ।
સૂક્ષ્મં શરીરં વૈ વિપ્રા ઇત્યાહુર્વેદપારગાઃ ॥ ૬૭॥

મિલિતાઃ પઞ્ચ પ્રાણાશ્ચ પઞ્ચકર્મેન્દ્રિયૈઃ સહ ।
ધ્રુવં પ્રાણમય કોશ ઇત્યાખ્યામાપ્નુવન્ત્યહો ॥ ૬૮॥

એકમેવ મનઃ પઞ્ચજ્ઞાનેન્દ્રિય સમન્વિતમ્ ।
નામ્ના મનોમયઃ કોશો નૂનભાખ્યાયતે બુધૈઃ ॥ ૬૯॥

એકૈ મિલિતા બુદ્ધિઃ પઞ્ચજ્ઞાનેન્દ્રિયૈઃ સહ ।
વિજ્ઞાનમયકોશાખ્યાં ભજતે નાત્ર સંશયઃ ॥ ૭૦॥

કારણાખ્યવપુર્ભૂતાઽવિદ્યાયાં નન્વવસ્થિતમ્ ।
સત્ત્વં માલિન્યસઞ્જુષ્ટં સ્વરૂપાજ્ઞાનમેવ હિ ॥ ૭૧॥

પ્રિયમોદપ્રમોદૈર્વૈ ભાવૈરેભિર્યુતઞ્ચ સત્ ।
આનન્દમયનામાઽસૌ કોશઃ સમ્પ્રોચ્યતે બુધૈઃ ॥ ૭૨॥

ચતુર્વિંશતિતત્ત્વાનાં યતોઽસ્ત્યેતદ્ધિ કારણમ્ ।
અતસ્તદેવ સમ્પ્રોક્તં શરીરં કારણાભિધમ્ ॥ ૭૩॥

એભિશ્ચ પઞ્ચભિઃ કોષૈઃ સમ્બદ્ધમધુના મયા ।
શ્રૂયતાં પ્રોચ્યમાનં તદવસ્થાત્રયલક્ષણમ્ ॥ ૭૪॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યમવસ્થાત્રયમસ્ત્યહો ।
પઞ્ચજ્ઞાનેન્દ્રિયૈર્યત્ર શ્રોત્રપ્રભૃતિભિર્દ્વિજાઃ ॥ ૭૫॥

શબ્દાદિવિષયાઃ સમ્યજ્જ્ઞાયન્તે જાગ્રદસ્તિ સા ।
સ્થૂલદેહાભિમાન્યાત્મા વિશ્વ ઇત્યુચ્યતે બુધૈઃ ॥ ૭૬॥

યત્ર જાગ્રદવસ્થાયાં યચ્ચ દૃષ્ટં શ્રુતઞ્ચ યત્ ।
તજ્જન્યૈર્વાસનાપુઞ્જૈઃ પ્રપઞ્ચઃ સમ્પ્રતીયતે ॥ ૭૭॥

સ્વપ્નાવસ્થાઽસ્તિ સા જાગ્રત્સુષુપ્ત્યન્તરવર્ત્તિનીમ્ ।
સૂક્ષ્મદેહાભિમાન્યાત્મા પ્રોચ્યતે તૈજસાભિધઃ ॥ ૭૮॥

ન મયા કિમપિ જ્ઞાતં સુખં નિદ્રાઽન્વભાવિ ચ ।
ઇતિ જાગ્રદવસ્થાયામાનુભૂતિસ્મૃતિર્હિ યા ॥ ૭૯॥

સા સુષુપ્ત્યભિધાવસ્થા કીર્ત્યતે તત્ત્વકોવિદૈઃ ।
આત્મા કારણદેહસ્યાભિમાની પ્રાજ્ઞ ઉચ્યતે ॥ ૮૦॥

સમષ્ટિઃ સ્થૂલદેહાનાં વિરાણ્નામ્નાઽભિધીયતે ।
અતઃ સ્થૂલશરીરસ્યાધિદેવો વિશ્વનામકઃ ॥ ૮૧॥

સૂક્ષ્મરાજ્યસ્થદેવાનાં સૂક્ષ્મદેહાવલમ્બિનામ્ ।
તેજોમયં શરીરં સ્યાન્ધતો નૂનં મહર્ષયઃ ॥ ૮૨॥

સૂક્ષ્મદેહાભિમાન્યસ્તિ દેવોઽતસ્તૈજસાભિધઃ ।
સૂક્ષ્માદ્ યતોઽતિસૂક્ષ્મવૈ શરીરં કારણં તતઃ ॥ ૮૩॥

દેવઃ કારણદેહસ્યાભિમાની પ્રાજ્ઞ ઉચ્યતે ।
ચતુર્વિંશતિતત્ત્વાનિ વર્ણયામિ નિશમ્યતામ્ ॥ ૮૪॥

નૈકધૈનાનિ નૈકે નુ વર્ણયન્તિ મહર્ષયઃ ।
મતાન્તરાણાં સર્વેષાં સિદ્ધાન્તે ન તુ ભિન્નતા ॥ ૮૫॥

શ્રોત્રત્વચૌ તથા ચક્ષુરસના ઘ્રાણમેવ ચ ।
પઞ્ચજ્ઞાનેન્દ્રિયાણ્યાહુર્વિજ્ઞા વેદાન્તપારગાઃ ॥ ૮૬॥

વાક્પાણિપાદપાયૂપસ્થાખ્યાનિ દ્વિજસત્તમાઃ ।
પઞ્ચ કર્મેન્દ્રિયાણ્યાહુસ્તત્ત્વાન્વેષણતત્પરાઃ ॥ ૮૭॥

પ્રાણાપાનૌ સમાનશ્ચોદાનવ્યાનૌ તથૈવ ચ ।
પ્રાણાઃ પઞ્ચ સમાખ્યાતાઃ પ્રાણતત્ત્વાનુચિન્તકૈઃ ॥ ૮૮॥

હૃદિ પ્રાણો ગુદેઽપાનઃ સમાનો નાભિમણ્ડલે ।
ઉદાનઃ કણ્ઠદેશે સ્યાદ્વ્યાનઃ સર્વશરીરગઃ ॥ ૮૯॥

શબ્દઃ સ્પર્શસ્તથા રૂપં રસો ગન્ધસ્તથૈવ ચ ।
તન્માત્રાણ્યપિ પઞ્ચૈવ બ્રુવતે તદ્વિદો જનાઃ ॥ ૯૦॥

મનો બુદ્ધિસ્તથા ચિત્તમહઙ્કારસ્તથૈવ ચ ।
અન્તઃકરણભેદાઃ સ્યુશ્ચત્વારો નાત્ર સંશયઃ ॥ ૯૧॥

ચતુર્વિંશતિતત્ત્વાતિ સન્ત્યેતાન્યેવ સત્તમાઃ ।
પઞ્ચવિંશતમં તત્ત્વમહમેવાસ્મ્યસંશયમ્ ॥ ૯૨॥

વિપ્રાઃ પુરુષરૂપેણ નૈવ કાર્યોઽત્ર વિસ્મયઃ ।
તત્ત્વાતીતં પરં તત્ત્વં તત્ત્વજ્ઞા માઁ બ્રુવન્ત્યતઃ ॥ ૯૩॥

વિષયા ઇન્દ્રિયાણાઞ્ચ વર્ણ્યન્તેઽતઃ પરં મયા ।
સમાહિતૈર્ભવદ્ભિસ્તે શ્રૂયન્તાં વિપ્રપુઙ્ગવાઃ ! ॥ ૯૪॥

શ્રોત્રસ્ય વિષઃ શબ્દસ્ત્વચઃ સ્પર્શસ્તથૈવ ચ ।

ચક્ષુષો રૂપમેવાસ્તિ રસાનાયા રસસ્તાથા ॥ ૯૫॥

ઘ્રાણસ્ય વિષયો ગન્ધો વિદ્યતે નાત્ર સંશયઃ ।
વચનં સ્યાદ્વાગ્વિષયઃ પાણ્યોરાદાનમેવ ચ ॥ ૯૬॥

ગમનં પાદયોઃ પાયોર્મલોત્સર્ગશ્ચ વિદ્યતે ।
મૂત્રત્યાગ ઉપસ્થસ્ય વિષયોઽસ્તિ મહર્ષયઃ ! ॥ ૯૭॥

ગુહ્યમેકં રહસ્યં વો બ્રાહ્મણાઃ ! વર્ણયામ્યહમ્ ।
યદિન્દ્રિયદ્વયસ્યાથ શ્રૂયતાં તત્સમાહિતૈઃ ॥ ૯૮॥

જિહ્વાયાં વાગ્રસાદાનૈતચ્છક્તિદ્વયયોગતઃ ।
અત્યન્તમેવ જિહ્વાઽસૌ પ્રબલા વિદ્યતે ખલુ ॥ ૯૯॥

શિશ્નયોન્યોસ્તથૈવાસ્તે નૃનારીચિહ્નયોરપિ ।
મૂત્રત્યાગાત્મકઃ કર્મેન્દ્રિયસ્ય વિષયો નનુ ॥ ૧૦૦॥

અત્યન્તપ્રબલસ્પર્શસુખં જ્ઞાનેન્દ્રિયસ્ય ચ ।
તયોઃ પ્રાબલ્યમેવાતઃ પ્રસિદ્ધં સર્વથાસ્ત્યલમ્ ॥ ૧૦૧॥

સઙ્કલ્પો નિશ્ચયો નૂનં સ્મરણં ગર્વ એવ ચ ।
નન્વન્તઃકરણસ્યૈતે વિષયાઃ સ્યુર્યથાક્રમમ્ ॥ ૧૦૨॥

કથ્યન્તે સામ્પ્રતં વિજ્ઞાઃ ! દેવાસ્તત્ત્વાભિમાનિનઃ ।
નિશમ્યન્તાં ભવદ્ભિશ્ચ દત્તચિત્તૈર્મહર્ષયઃ ! ॥ ૧૦૩॥

દિગ્વાતાર્કપ્રચેતોઽશ્વિવહ્નીન્દ્રોપેન્દ્રમૃત્યવઃ ।
શિવશ્ચન્દ્રશ્ચતુર્વક્ત્રો રુદ્રઃ ક્ષેત્રજ્ઞ ઈશ્વરા ॥ ૧૦૪॥

શ્રોત્રસ્ય હિ દિશો દેવાસ્ત્વચો વાયુર્ન સંશયઃ ।
સૂર્યોઽસ્તિ ચક્ષુષો દેવો વરુણો રસનાધિપઃ ॥ ૧૦૫॥

ઘ્રાણસ્યાપ્યશ્વિનૌ દેવૌ વહ્નિર્વાચો ન સંશયઃ ।
ઇન્દ્રઃ પાણીન્દ્રિયસ્યાસ્તિ હ્યુપેન્દ્રઃ પાદયોસ્તથા ॥ ૧૦૬॥

મૃત્યુર્ગુદેન્દ્રિયસ્યાસ્ત ઉપસ્થસ્ય શિવસ્તથા ।
રસના-યોન્યુપસ્થેષુ દ્વિધા શક્તિરવસ્થિતા ॥ ૧૦૭॥

તેષામ્પ્રત્યેકમેવાતો દ્વૌ દેવૌ ભવતો ધ્રુવમ્ ।
વરુણાગ્નિદ્વયસ્યાસ્તિ રસના પીઠરૂપિણી ॥ ૧૦૮॥

પ્રજાપતિસ્તથા વાયુઃ શિવશ્ચૈવ મહર્ષયઃ ! ।
પીઠસ્થાનં ત્રિદેવાનામુક્તાનાં યોનિશિશ્નયોઃ ॥ ૧૦૯ ॥

અસ્ત્યતઃ સૃષ્ટિકાર્યેષુ લિઙ્ગયોન્યોઃ પ્રધાનતા ।
નાત્ર કશ્ચન સન્દેહઃ કર્તવ્યો વિપ્રપુઙ્ગવાઃ ॥ ૧૧૦ ॥

ચન્દ્રમા મનસો દેવો બુદ્ધેચ ચતુરાનનઃ ।
ચિત્તસ્ય દેવઃ ક્ષેત્રજ્ઞો રુદ્રશ્ચાનુવમ્ ॥ ૧૧૧ ॥

વિજ્ઞાઃ ! ઉપનિષજ્જ્ઞાનમન્તઃકરણગોચરમ્ ।
કિઞ્ચિદ્વો વર્ણયામ્યત્ર દત્તચિત્તૈર્નિશમ્યતામ્ ॥ ૧૧૨ ॥

મનો બુદ્ધિરહઙ્કારશ્ચતુર્થં ચિત્તમેવ ચ ।
એતચ્ચતુષ્ટયં જ્ઞેયમન્તઃકરણસંજ્ઞકમ્ ॥ ૧૧૩ ॥

એતચ્ચતુષ્ટયસ્યૈવ બ્રહ્મૈવ કેવલં કિલ ।
વિદ્યતેઽધિપતિર્દેવ એક એવ ન સંશયઃ ॥ ૧૧૪ ॥

અતોઽસૌ ગીયતે લોકે સર્વથા ચતુરાનનઃ ।
અત્રાપિ કારણં વિત્ત બુદ્ધેઃ પ્રધાન્યમેવ હ ॥ ૧૧૫ ॥

માયયોપહિતં બ્રહ્મ વિજ્ઞૈરીશ્વર ઉચ્યતે ।
અવિદ્યોપહિતં બ્રહ્મ જીવઃ સમ્પ્રોચ્યતે તથા ॥ ૧૧૬ ॥

અવિદ્યામાયયોર્વિપ્રાઃ ! વેદે વર્ણિતયોઃ સદા ।
વ્યોમપાતાલવદ્ભેદ એતયોઃ સમ્પ્રતીયતે ॥ ૧૧૭ ॥

વિજ્ઞાનઞ્ચાત્ર વો વચ્મિ પાર્થક્યાનુગતં તયોઃ ।
અવિદ્યા હિ સદા જીવાન્નિજાયત્તાન્ પ્રકુર્વતી ॥ ૧૧૮ ॥

બદ્ધાઽઽસજ્જાયતે સ્વસ્યાં મહામાયા પરન્ત્વહો ।
વિદ્યાસ્વરૂપિણી ભૂત્વા સર્વદેશ્વરસાત્સતી ॥ ૧૧૯ ॥

તમેવ સેવમાના ચ જગત્સૃષ્ટિલયસ્થિતીઃ ।
આસ્તે સા વિદધાનાઽતઃ પાર્થક્યં વિપુલં તયોઃ ॥ ૧૨૦ ॥

શરીરં મે ચ મે પ્રાણા મનો મે ધીશ્ચ મેઽસ્તિ મે ।
જ્ઞાનમિત્થં પ્રતીયન્તે પઞ્ચ કોશાઃ પૃથક પૃથક્ ॥ ૧૨૧ ॥

યથા સ્વત્વેન વિજ્ઞાતમલઙ્કારગૃહાદિકમ્ ।
સ્વસ્માદ્ભિન્નં વરીવર્ત્તિ પઞ્ચ કોશાસ્તથા દ્વિજાઃ ! ॥ ૧૨૨ ॥

મદીયત્વેન વિજ્ઞાતા નૈવાત્મા સ્યાત્ કદાચન ।
કિન્ત્વાત્મા પઞ્ચકોષાણાં જ્ઞાતૈવ ભવતિ ધ્રુવમ્ ॥ ૧૨૩॥

કારણસ્થૂલસૂક્ષ્માણિ શરીરાણ્યેવમેવ ચ ।
જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યમવસ્થાત્રયમેવ હિ ॥ ૧૨૪॥

ચતુર્વિંશતિતત્ત્વાનિ પૂર્વમુક્તાનિ યાનિ વૈ ।
જીવેશ્વરૌ દ્વિજાઃ ! એતે આત્મા નૈવ કદાચન ॥ ૧૨૫॥

તત્ત્વજ્ઞાનાશ્રયાદિત્થં નેતિ નેતિ વિચારતઃ ।
સર્વં સ્થૂલં સ્યજન્તોઽલં સૂક્ષ્માન્વેષણતત્પરાઃ ॥ ૧૨૬॥

ભવેયુશ્ચેન્નિરાસક્તાસ્તત્વાતીતં પદં ગતાઃ ।
તદા માં સર્વદા તત્ર ભવન્તો દ્રષ્ટુમીશતે ॥ ૧૨૭॥

અતીતઃ સર્વતત્ત્વેભ્યઃ તથૈવ પઞ્ચકોષતઃ ।
સચ્ચિદાનન્દરૂપોઽહમિતિ જાનીત્ નિશ્ચિતમ્ ॥ ૧૨૮॥

ઇતિ શ્રીધીશગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં
યોગશાસ્ત્રે ધીશર્ષિસમ્વાદે વેદાન્તનિરૂપણં
નામ પઞ્ચમોઽધ્યાયઃ ।

## ૬. વેદાન્તસિદ્ધાન્તનિરૂપણમ્

અથ ષષ્ઠોઽધ્યાયઃ ।
શ્રીગણપતિરુવાચ ॥ ૧॥

મત્પ્રકૃત્યૈવ જાતસ્ય બ્રહ્મણઃ કાર્ય્યરૂપિણઃ ।
સ્વરૂપં વર્ણિતં વિપ્રાઃ ! ભવદ્ભિશ્ચ શ્રુતં ખલુ ॥ ૨॥

ચતુર્વિંશતિતત્ત્વૈર્હિ પિણ્ડબ્રહ્માણ્ડરૂપકમ્ ।
દૃશ્યમાનં જગજ્જાતં સર્વમેતચ્ચરાચરમ્ ॥ ૩॥

પઞ્ચકોષાશ્ચ પિણ્ડાનિ વ્યાપ્નુવન્તો મહર્ષયઃ ! ।
આવૃણ્વન્તોઽવતિષ્ઠન્તે મત્સ્વરૂપં ન સંશયઃ ॥ ૪॥

તત્ત્વજ્ઞૈઃ સર્વપિણ્ડેષુ પઞ્ચકોશસમન્વયમ્ ।
જ્ઞાત્વા સર્વત્ર મચ્છક્તેસ્ત્વેકત્વમનુભૂયતે ॥ ૫॥

મમૈવ પ્રકૃતિર્વિજ્ઞાઃ ! માયાનામ્નાઽભિધીયતે ।
નૂનં ત્રૈગુણ્યમય્યેષા ભવન્તી પરિણામિની ॥ ૬॥

કુર્વત્યાસ્તે સદા વિપ્રાઃ ! દૃશ્યસૃષ્ટિલયસ્થિતીઃ ।
સૃષ્ટિકાલે ભવેત્તસ્યા આકાશઃ પ્રકૃતેસ્તતઃ ॥ ૭॥

આકાશાદ્વાયુરપ્યેવં વાયોરગ્નિર્ન સંશયઃ ।
અગ્નેર્જલં જલાત્પૃથ્વી જાયતે બ્રાહ્મણોત્તમાઃ ! ॥ ૮॥

એતેષાં પઞ્ચતત્ત્વાનામાકાશસ્ય ભવેત્પુનઃ ।
સાત્ત્વિકાદંશતો નૂનમિન્દ્રિયં શ્રોત્રનામકમ્ ॥ ૯॥

વાયોસ્ત્વક્ સાત્ત્વિકાદંશાદગ્નેચક્ષુર્ભવેત્તતઃ ।
જલસ્ય સાત્ત્વિકાદંશાદ્રસના જાયતે ધ્રુવમ્ ॥ ૧૦॥

પૃથિવ્યાઃ સાત્ત્વિકાદંશાદ્ઘ્રાણમુત્પદ્યતે દ્વિજાઃ !
એતેષાં પઞ્ચતત્ત્વાનાં સમષ્ટેઃ સાત્ત્વિકાંશતઃ ॥ ૧૧॥

મનો બુદ્ધિરહઙ્કારસ્તથા ચિત્તં ભવન્ત્યહો ।
દ્વિજોત્તમાઃ ! મનઃ કર્તૃસ્યાત્સઙ્કલ્પવિકલ્પયોઃ ॥ ૧૨॥

અહઙ્કારોઽસ્ત્યહઙ્કર્તા બુદ્ધિર્નિશ્ચયકારિણી ।
ચિત્તં સ્મર્તૃ ચ સર્વેષાં સંસ્કારાણાં યતઃ ખનિઃ ॥ ૧૩॥

એતેષુ પઞ્ચતત્ત્વેષુ હ્યાકાશસ્ય રજોંઽશતઃ ।
વાગિન્દ્રિયં સમુત્પન્નં વાયોઃ પાણીન્દ્રિયં તથા ॥ ૧૪॥

અગ્નેરાજસિકાદં શાજ્જાયતે પાદ ઇન્દ્રિયમ્ ।
જલસ્ય રાજસાદંશાત્ સ્યાદુપસ્થેન્દ્રિયં તથા ॥ ૧૫॥

ગુદેન્દ્રિયં પૃથિવ્યાસ્તુ રાજસાંશાત્પ્રજાયતે ।
એતેષાં પઞ્ચતત્ત્વાનાં સમષ્ટે રાજસાંશતઃ ॥ ૧૬॥

પ્રાણાદયો ભવન્ત્યેતે વાયવઃ પઞ્ચસઙ્ખ્યકાઃ ।
કૃકરો નાગકૂર્મૌ ચ દેવદત્તધનઞ્જયૌ ॥ ૧૭॥

ઉપવાયવ એતે હિ તેષ્વેવાન્તર્ભવન્ત્યહો ।
એતેષાં પઞ્ચતત્ત્વાનાં તામસાંશસમષ્ટિતઃ ॥ ૧૮॥

પઞ્ચીકૃતાનિ જાયન્તે મહાભૂતાનિ પઞ્ચ ચ ।
સ્થૂલાક્ષ્યગોચરં વિપ્રાઃ ! સૂક્ષ્મરાજ્યં સદા ભવેત્ ॥ ૧૯॥

સ્થૂલં વિશ્વં મહાભૂતૈર્જાતં પઞ્ચીકૃતૈર્યતઃ ।
સૂક્ષ્મૈઃ પઞ્ચમહાભૂતૈઃ કથં પઞ્ચીકૃતાન્યહો ॥ ૨૦॥

પઞ્ચ સ્થૂલાનિ જાયન્તે મહાભૂતાનિ ભૂસુરાઃ ! ।
તત્પ્રકારં પ્રવક્ષ્યેઽહં શ‍ૃણુધ્વં સુસમાહિતાઃ ॥ ૨૧॥

એતત્પઞ્ચમહાભૂતતામસાંશસ્વરૂપકમ્ ।
એકમેકં દ્વિધા ભૂતં વિભજ્યૈકૈકમર્દ્ધકમ્ ॥ ૨૨॥

અવસ્થાપ્યાપરં વિજ્ઞાઃ ! ચતુર્ધાઽપરમર્દ્ધકમ્ ।
વિભજ્યૈવં પૃથક્ત્વેન સ્થાપિતાર્દ્ધેષુ નિશ્ચિતમ્ ॥ ૨૩॥

વિભાગેષુ વિભક્તસ્ય ચતુર્ધા વિપ્રપુઙ્ગવાઃ ! ।
એકૈકસ્ય ચ ભૂતાર્દ્ધાત્મકસ્યૈકં કિલૈકકં ૨૪॥

અંશં કૃત્વાઽથ સંયુક્તં સ્યાત્પઞ્ચીકરણં ધ્રુવમ્ ।
પઞ્ચીકરણનામાયં વિધિરત્યન્તમદ્ભુતઃ ॥ ૨૫॥

સ્વાર્દ્ધે પ્રત્યેકભૂતસ્યાપરેષાં મિશ્રિતો ભવેત્ ।
ભૂતાનામર્દ્ધભાગસ્ય ચતુર્થાંશો ન સંશયઃ ॥ ૨૬॥

યથા પઞ્ચીકૃતાકાશે તસ્યાપઞ્ચીકૃતસ્ય નુ ।
અર્દ્ધમસ્ત્યપરેષાઞ્ચ ભૂતાનાં હે મહર્ષયઃ ॥ ૨૭॥

નન્વપઞ્ચીકૃતાનામ્વૈ અષ્ટમાંશો ન સંશયઃ ।
એવમન્યેષુ ભૂતેષુ વોદ્ધવ્યં મિશ્રણં ધ્રુવમ્ ॥ ૨૮॥

એતૈઃ પઞ્ચીકૃતૈઃ પઞ્ચમહાભૂતૈર્હિ જાયતે ।
બ્રહ્માણ્ડં સતતં સ્થૂલં પ્રત્યેકં નાત્ર સંશયઃ ॥ ૨૯॥

બ્રહ્માણ્ડમપિ પ્રત્યેકમધયોર્ધ્વં વિભજ્યતે ।
તચ્ચતુર્દશલોકેષુ નાનાશ્ચર્ય્યમયેપ્યહો ॥ ૩૦॥

બ્રહ્માણ્ડે તત્ર પ્રત્યેકમુદ્ભિજ્જસ્વેદજાણ્ડજાઃ ।
જરાયુજાશ્ચ જાયન્તે ચતુર્ધા સ્થૂલદેહકાઃ ॥ ૩૧॥

દૈવ્યાસ્તદ્વ્યતિરિક્તં વૈ સૃષ્ટેર્વૈચિત્ર્યમુત્તમમ્ ।
કિમપ્યપૂર્વમેતેભ્યો વિદ્યતે વિપ્રપુઙ્ગવાઃ ! ॥ ૩૨॥

જીવાસ્તત્તચ્છરીરાણામભિમાનિન આસતે ।

ઈશ્વરોઽનન્તબ્રહ્માણ્ડાભિમાની વિદ્યતે ખલુ ॥ ૩૩॥

બ્રહ્માણ્ડપિણ્ડયોરૈક્યમેવં જાતં મર્હષયઃ ! ।
નૈવાત્ર વિસ્મયઃ કાર્યો ભવદ્ભિર્વિપ્રપુઙ્ગવા ! ॥ ૩૪॥

ઈશ્વરસ્ય ચ જીવસ્ય ભેદો બ્રહ્મણિ કલ્પ્યતે ।
માયાઽવિદ્યાત્મકાન્નૂનં ક્રમાદાવરણાદ્દ્વિજાઃ ! ॥ ૩૫॥

બ્રહ્મણઃ પ્રતિબિમ્વં હિ જીવો દેહાભિમાનકઃ ।
સ્વસ્માત્સ્વભાવતો ભિન્ન ઈશ્વરસ્તેન મન્યતે ॥ ૩૬॥

ઈશ્વરસ્ય ચ જીવસ્ય ભેદો યાવદુપાધિતઃ ।
તિષ્ઠેત્, તાવત્ક્ષણં વિપ્રાઃ ! કથઞ્ચિચ્ચ કદાચન ॥ ૩૭॥

જન્મમૃત્યુપ્રવાહોઽસૌ સંસારો ન નિવર્ત્તતે ।
ઈશ્વરે ચૈવ જીવે ચ ભેદબુદ્ધિઃ કદાપ્યતઃ ॥ ૩૮॥

ન કર્તવ્યા દ્વિજશ્રેષ્ઠાઃ ! તત્ત્વજ્ઞૈરાત્મવેદિભિઃ ।
મઙ્ગલં જાયતે તેષામતો નૂનં મહર્ષયઃ ॥ ૩૯॥

સાહઙ્કારસ્ય જીવસ્ય કિઞ્ચિજ્જ્ઞસ્ય હિ કોવિદાઃ ! ।
સર્વજ્ઞેનેશ્વરેણાહો નિરહઙ્કારિણા સહ ॥ ૪૦॥

તત્ત્વમસ્યાદિભિર્વાક્યૈરેતયોર્ભિન્નધર્મયોઃ ।
કથં ન્વભેદબુદ્ધિઃ સ્યાચ્છઙ્ક્યતે ચેન્નિશમ્યતામ્ ॥ ૪૧॥

અર્થદ્વયં દ્વિજશ્રેષ્ઠાઃ ! સ્યાત્તત્ત્વમ્પદયોર્દ્વયોઃ ।
વાચ્યાર્થશ્ચૈવ ભો વિજ્ઞાઃ! લક્ષ્યાર્થશ્ચ ન સંશયઃ ॥ ૪૨॥

અવિદ્યાવાંશ્ચ તત્કાર્યકર્તૃત્વાદિગુણૈર્યુતઃ ।
જીવો દેહાભિમાનીતિ વાચ્યાઽર્થસ્ત્વમ્પદસ્ય હિ ॥ ૪૩॥

અવિદ્યોપાધિનિર્મુક્તં સમાધેશ્ચ દશાં ગતમ્ ।
અવિદ્યયા ચ તત્કાર્યૈ રહિતં પ્રતિભાન્વિતાઃ ! ॥ ૪૪॥

ચિન્માત્રં શુદ્ધચૈતન્યં લક્ષ્યાર્થસ્ત્વમ્પદસ્ય વૈ ।
વાચ્યાશ્ચૈવ લક્ષ્યાર્થસ્તત્પદસ્યાપિ કથ્યતે ॥ ૪૫॥

માયાતત્કાર્ય્યસર્વજ્ઞભાવાદિગુણસંયુતઃ ।
ઈશ્વરસ્તત્પદસ્યાસ્તિ વાચ્યાર્થો નાત્ર સંશયઃ ॥ ૪૬॥

માયાતત્કાર્ય્યતઃ શૂન્યં માયોપાધિવિવર્જિતમ્ ।
ચિન્માત્ર શુદ્ધચૈતન્યં લક્ષ્યાર્થસ્તત્પદસ્ય વૈ ॥ ૪૭॥

ઈશ્વરસ્ય ચ જીવસ્ય શુદ્ધચૈતન્યરૂપતઃ ।
અભેદે વાધકાભાવઃ સ્યાદેવં બ્રાહ્મણોત્તમાઃ ! ॥ ૪૮॥

’અહં બ્રહ્માસ્મિ” ચેત્યાદિમહાવાક્યૈરપિ દ્વિજાઃ ! ।
વિજ્ઞાયતે તયોરૈક્યમુભયોર્નાત્ર સંશયઃ ॥ ૪૯॥

બ્રહ્મ સત્યં જગન્મિથ્યા જીવો બ્રહ્મૈવ કેવલમ્ ।
ઇતિ શાસ્ત્રોપદેશેન શ્રીગુરોરુપદેશતઃ ॥ ૫૦॥

સ્વાનુભૂત્યાઽથવા વિજ્ઞાઃ ! યે વિદન્તિ સુસાધકાઃ ।
યેષાઞ્ચ પ્રાણિમાત્રેષુ સર્વેષુ બ્રાહ્મણોત્તમાઃ ! ॥ ૫૧॥

બ્રહ્મબુદ્ધિઃ સમુત્પન્ના જ્ઞાનયોગેન સર્વથા ।
ત એવ જ્ઞાનિનો ભક્તા જીવન્મુક્તા ભવન્તિ મે ॥ ૫૨॥

એતદ્વેદાન્તસિદ્ધાન્તતાત્પર્ય્યં હિ નિશમ્યાતમ્ ।
અવિદ્યોપાધિસમ્ભ્રાન્તિર્યદા દૂરીભવિષ્યતિ ॥ ૫૩॥

બ્રહ્મસત્તૈવ લક્ષ્યાર્થરૂપેણૈવાવશિષ્યતે ।
માયોપાધેર્મહત્ત્વઞ્ચ તત્ત્વજ્ઞાનેન વેત્સ્યતે ॥ ૫૪॥

તતશ્ચ બ્રહ્મરૂપો હિ લક્ષ્યાર્થઃ પરિશિષ્યતે ।
જીવન્મુક્તા મહાત્માનસ્તત્ત્વજ્ઞાનાબ્ધિપારગાઃ ॥ ૫૫॥

જીવેશયોરિત્થમેતદભેદમનુભૂય ચ ।
બ્રહ્માનન્દે નિમજ્જન્તઃ કૃતકૃત્યા ભવન્તિ તે ॥ ૫૬॥

જડ્ગૈર્જીવગણૈર્વિશ્વં વિષયાત્મકમીક્ષ્યતે ।
અજ્ઞાનિજીવજાતેન સુખરૂપં નિરીક્ષ્યતે ॥ ૫૭॥

જગત્પ્રપઞ્ચજાતન્તુ જ્ઞાનવદ્ભિવિવેકિભિઃ ।
પરિણામીતિ વિજ્ઞાય દુઃખરૂપં પ્રતીયતે ॥ ૫૮॥

કિન્તુ મે જ્ઞાનિનો ભક્તા જીવન્મુક્તગણાઃ ખલુ ।
સંસારમેતં પશ્યન્તિ સ્વરૂપે ક્વાઽપ્યલૌકિકે ॥ ૫૯॥

સંસારં મે પ્રકૃત્યૈતં પ્રસૂતં સર્વથાઽદ્ભુતમ્ ।
આકાશ ઇવ ગાન્ધર્વં પશ્યન્તો નગરં મુહુઃ ॥ ૬૦॥

મિથ્યૈવ તત્સ્વરૂપઞ્ચ જાનન્તોઽપિ દ્વિજોત્તમાઃ ! ।
દર્શં દર્શં પ્રમોદન્તે તદ્રૂપં કૌતુકપ્રદમ્ ॥ ૬૧॥

મૃગતૃષ્ણાસમં વિશ્વં ભ્રાન્તિસ્તોમસમાકુલમ્ ।
દૃષ્ટ્વેન્દ્રજાલવન્મિથ્યા-પ્રપઞ્ચાવલિમૂલકમ્ ॥ ૬૨॥

મમ શક્તેર્ગુણાનાઞ્ચ પરિણામસ્વરૂપકમ્ ।
તત્ર નૈવ પ્રસજ્જન્તે પદ્મપત્રમિવામ્ભસિ ॥ ૬૩॥

તિષ્ઠન્તોઽપિ પ્રપઞ્ચેષુ પૃથગભૂતાસ્તતો ધ્રુવમ્ ।
ભવિતું હ્યેતદેવાઽર્હ્યં લક્ષ્યમુચ્ચપદં હિતમ્ ॥ ૬૪॥

શ્રેષ્ઠાનાં બ્રાહ્મણાનાં હિ સર્વત્રવૈ સુખાવહમ્ ।
પરીવારોપમાસ્તેષાં સંસારા અખિલા અમી ॥ ૬૫॥

દેવર્ષિપિતૃસઙ્ઘાશ્ચ તદર્થં બાન્ધવોપમાઃ ।
ત્યાજ્યં વાઽઽદેયમપ્યસ્તિ તેષાં નૈવેહ કિઞ્ચન ॥ ૬૬॥

પિતરૌ ચ કુલં જાતિં સ્થૂલદેહેન કુર્વતે ।
નિખિલાં પૃથિવીં વન્યાં માતૃભૂમિં વિશેષતઃ ॥ ૬૭॥

દૈવીઞ્ચ જગતીં સૂક્ષ્માં સૂક્ષ્મ દેહેન કુર્વતે ।
સર્વદા સર્વથા ધન્યાં તે વિપ્રા નૈવ સંશયઃ ॥ ૬૮॥

બ્રહ્માનન્દસુસન્દોહસવિલાસસ્વરૂપતઃ ।
ધન્યં ધન્યં પુનર્ધન્યં કુર્વતે મામસંશયમ્ ॥ ૬૯॥

ઇતિ શ્રીધીશગીતાસુપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાત્રે
ધીશર્ષિસંવાદે વેદાન્તસિદ્ધાન્તનિરૂપણં નામ
ષષ્ઠોઽધ્યાયઃ ।

## ૭. વિરાટ્સ્વરૂપનિરૂપણમ્

અથ સપ્તમોઽધ્યાયઃ ।
ઋષય ઊચુઃ ॥ ૧॥

હે સર્વજ્ઞ ! જગન્નિવાસ ! ભગવાન્ ! દેવાદિદેવ ! પ્રભો !
હે સર્વાદિગુરો ! દયાર્ણવ ! વિભો ! વિશ્વેશ ! વિશ્વમ્ભર ! ।

અસ્માકં ભવતામપારકૃપયા નૂનં તૃતીયં વર-
    મધ્યાન્તર્નનયનાત્મકં સુવિમલં જ્ઞાનાક્ષિ પ્રોન્મીલિતમ્ ॥ ૨॥

પશ્યામોઽદ્ય ભવદ્દયોદયવશાદ્ધારે મણીનાં ગણાન્
    સૂત્રં પ્રોતમિવાન્તરેણ નિખિલબ્રહ્માણ્ડપિણ્ડવ્રજે ।
સર્વેષાં કુરુતે સદૈકવિધિનાઽનુસ્યૂતતામાપ્નવાન્
    ચૈતન્યાસ્તિતયોર્વિધાનમખિલં શશ્વદ્ભવાનિત્યહો ॥ ૩॥

પશ્યામસ્તરતો ગૃહેઽપરિમિતાન્ ભૂયો યથાઽનન્ત ! હે
    રન્ધ્રદ્વારનિવિષ્ટસૂર્ય્યકિરણસ્તોમેષ્વણૂનાં ગણાન્ ।
બ્રહ્માણ્ડાનિ તથા તરન્તિ ચ વિરાડ્ દેહાશ્રિતાનિ પ્રભો-
    ર્નાદ્યન્તેવિપુલેઽમિતાનિ વિયતિ પ્રોદ્યોતયન્તિ હ્યમુમ્ ॥ ૪॥

પશ્યામશ્ચ પુનર્વયં તવ વિરાડ્રૂપં હિ યત્રાધુના
    ભાત્યન્તો હરિતાં ન ચાદિરપિ તદ્દેશસ્ય સન્દૃશ્યતે ।
પશ્યામશ્ચ પુનર્વયં તવ મહાદેહે મહાકૌતુકમ્
    વ્યાપ્તશ્ચાઽગણિતૈર્વિરાડ્વપુષિ તે સૂર્ય્યગ્રહોપગ્રહૈઃ ॥ ૫॥

સઙ્ઘાતપ્રતિઘાતતઃ પરિણમન્ બ્રહ્માણ્ડભાણ્ડવ્રજઃ
    હ્યન્યોઽન્યં પરમાણુરૂપનિચયેઽનન્તો મહાકાલ ! હે ।
જાયન્તે પરમાણવશ્ચ નિખિલા બ્રહ્માણ્ડરૂપાઃ પુનઃ
    નાનાકારયુતાઃ પ્રભો ! વહુવિધાઃ પ્રત્યેકમેવ ક્ષણમ્ ॥ ૬॥

નક્ષત્રાવલિભિશ્ચ નૂનમખિલૈઃ ક્વાપિ ગ્રહોપગ્રહૈઃ
    સૂર્ય્યાદ્યૈર્હિ સમાવૃતાઃ સુસઘનાઃ સન્તઃ પરીણામતઃ ।
બ્રહ્માણ્ડવ્રજસમ્ભવક્ષયવિધિર્યત્ર પ્રભો ! ભાસતે
    કાલે તસ્ય ન દૃશ્યતે કથમપિ ત્વાદિર્ન ચાન્તઃ પરમ્ ॥ ૭॥

સાર્દ્ધઞ્ચૈવ વિરાડનન્તવપુષા પ્રોતૌતયોસ્તે તયોઃ
    નાન્તો નાદિરવેક્ષ્યતે કિમપિ ચેદ્દેશસ્ય કાલસ્ય ચ ।
દ્રષ્ટું તર્હિ વિરાડનન્તવપુષઃ શક્તઃ કથં કોઽવ્યહો
    આદિં ચાન્તમશેષતઃ કિમુત નૈ મૂઢા વતાઽસ્માદૃશાઃ ॥ ૮॥

ભૂતસ્રષ્ટરુ ! ભૂતપાલક ! સદા હે ભૂતહારિન્ ! વિભો !
    અસ્માભિર્નિખિલૈરિતીક્ષ્યત ઇહાનન્તાનિ ભૂયોઽપિ તે ।
બ્રહ્માણ્ડાનિ પૃથક્ પ્રકટ્ય પ્રકૃતેઃ કર્મપ્રવાહે પૃથક્ ।
    લીયન્તે પ્રકૃતૌ સ્વયં તવ મુહુઃ સદ્યો નિવિષ્ટાનિ ચ ॥ ૯॥

જાયન્તે પ્રકૃતેર્હિ પિણ્ડનિવહાસ્તે ભૂતભાવોભવ–
    કૃદ્રૂપેણ ચિતો જડએન સહ યો ગ્રન્થિર્વિસર્ગેણ વૈ ।
તદ્રૂપાઃ પરમાણુતો હ્યગણિતાઃ પ્રત્યેકતો હિ સ્વતઃ
    કર્મસ્રોતસિ તે પ્રવિશ્ય પ્રકૃતૌલીયન્ત એવં તતઃ ॥ ૧૦॥

પશ્યામશ્ચ ભવાનનન્તનયનો હે વિશ્વચક્ષુઃ ! ક્રમાત્ !
    પિણ્ડૌઘસ્ય ગતિં પ્રપશ્યતિ સદા બ્રહ્માણ્ડપુઞ્જસ્ય ચ ।
આકૃષ્યાઽભિમુખં નિજસ્ય નયતે ધર્મસ્ય શક્તયા ચ તં
    દૃષ્ટ્વા સર્વમલૌકિકં હિ ચકિતા બુદ્ધિર્ન એતાદૃશમ્ ॥ ૧૧॥

પશ્યામઃ પુનરપ્યનન્તનિખિલબ્રહ્માણ્ડાપિણ્ડાવલેઃ
    શ્રોત્રાનન્ત્યયુતઃ શ‍ૃણોતિ સતતં ભૂયો ભવાન્ પ્રાર્થનામ્ ।
ચિચ્છક્ત્યા ચિતિસંયુતાઞ્ચ વિદધત્તાં વિશ્વચેતઃ ક્રમાત્
    સાન્નિધ્યં ચ યથોત્તરં નિજમહો તસ્યૈ દિશન્ રાજતે ॥ ૧૨॥

પશ્યામશ્ચ ભવાનનન્તરસનાયુક્તઃ સુહૃત્ત્વં ગતઃ
    બુદ્ધે રૂપમધિશ્રિતો રસમય ! બ્રહ્માણ્ડપિણ્ડાવલેઃ ।
મધ્યેઽધ્યાત્મપદં વિવિચ્ય પરમાનન્દાત્મકં પ્રાણિનઃ
    સર્વાન્ દર્શયતે ગુરો ! નિજકૃપાલેશેન લોકાશ્રય ! ॥ ૧૩॥

હે તેજોમય ! તેજસાઞ્ચ નિવહાનાં હે ખને ! દૃશ્યતે
    ત્વં સ્પર્શેન્દ્રિયપુઞ્જકુઞ્જનિકરૈઃ સ્પૃષ્ટ્વા હ્યનન્તૈર્યુતઃ ।
સ્વૈસ્તેજોનિવહૈરનન્તગણિતબ્રહ્માણ્ડપિણ્ડાવલિં
    સર્વાં સ્વાભિમુખં પ્રકૃષ્ય પતનાચ્છશ્વદ્વિભો ! રક્ષસિ ॥ ૧૪॥

વિશ્વાધાર ! ચ નાસિકાભિરમિતાભિસ્ત્વં યુતો દૃશ્યસે
    જિઘ્રન્ પુણ્યસમૂહગન્ધમમલં બ્રહ્માણ્ડપિણ્ડાવલેઃ ।
અસ્તિત્વઞ્ચ વિલીનમેવ સતતં કર્ત્તું હિ તસ્યા નિજે
    કૈવલ્યાભ્યુદયૌ પ્રયચ્છસિ યથાયોગ્યાધિકારં પ્રભો ॥ ૧૫॥

ભાવાતીત ! વિભો ! સદા ત્રિગુણતોઽતીત ! પ્રભોઽનુક્ષણ-
    મસ્માત્પૂર્વમલૌકિકં ગુણમયં ભાવસ્વરૂપં તવ ।
રૂપં સર્વમનોહરં સુવિમલં દર્શેન્દ્રિયાપ્યાયક-
    મસ્માકં હિ મનો વ્યલીયત તદા સમ્પશ્યતાં સત્વરમ્ ॥ ૧૬॥

અદ્યત્વે તુ વિરાડ્સ્વરૂપમમુકં દૃષ્ટ્વા વિશાલં તવ

બુદ્ધિર્નઃ સ્થગિતા ચ યાતિ ચકિતાઽવસ્થાં વિલીનાં પુનઃ ।
રૂપં નઃ પરિદર્શયાદ્ય કૃપયા હ્યેવમ્વિધં સ્વં યતઃ
સાન્નિધ્યં ભવતામનુક્ષણમહો લબ્ધું વયઞ્ચેશ્મહે ॥ ૧૭॥

હે સર્વેશ્વર ! ભક્તકલ્પલતિકારૂપ ! પ્રભો ! પાલક !
રૂપેણાપિવિવર્જિજતો વિભુરહો ભવ્યાય ભક્તાવલેઃ ।
ભક્તાનાં પ્રકૃતિપ્રવૃત્તિજનિતાં સ્વીકૃત્ય વૈ પ્રાર્થનાં
કલ્યાણં સગુણં સ્વરૂપમભિતં સાપ્નોતિ વિભ્રદ્ભવાન્ ॥ ૧૮॥

વિભ્રાણો રવિરૂપમેવ સવિતઃ ! ભક્તાન્ ભવાંસ્તેજસા
આકર્ષત્યનિશં વિભો ! હ્યતિતરાં કૈવલ્યભૂમૌ ધ્રુવમ્ ।
હે નારાયણ ! વિષ્ણુરૂપમભિતઃ સ્વીકૃત્ય ચિદ્ભાવતો
બ્રહ્મીભાવમિમાન્ નિરીક્ષ્ય નયતે તેષાં ક્રમેણોન્નતિમ્ ॥ ૧૯॥

દેવીરૂપમહો ધરન્ હિ નયતે ધર્મસ્ય શક્ત્યા ભવાન્
સર્વેષાં હ નિયામકં પરપદં હે શક્તિમન્ ! તાન્સદા ।
અસ્તિત્વસ્ય વિધાયકં ચ બહુ સદ્ભાવેન ભક્તાન્નિજાન્
હે શમ્ભો ! શિવરૂપતો ગમયતે નિઃશ્રેયસં નિર્ભયમ્ ॥ ૨૦॥

સ્વં ભક્તાઞ્ચ ધિયા સ્વરૂપમનિશં સન્દર્ય સિદ્ધેઃ પતે !
દત્તે મુક્તિપદં પરં ગણપતેર્ધૃત્વા સ્વરૂપં ભવાન્ ।
સર્વેષામિહ વર્ત્તતે ખલુ ગુરો ! હ્યાદ્યો ગુરૂણાં ગુરુ-
ર્દેશાદસ્તિ ભવાન હિ શશ્વદપરિચ્છિન્નસ્તથા કાલતઃ ॥ ૨૧॥

ત્વં સર્વાદિગુરુર્વિભાસિ સકલાંજ્ઞાનસ્વરૂપે સદા
આદાયર્ષિગણા વયં તવ વિભો ! જ્ઞાનાબ્ધિવિપ્રુડ્લવમ્ ।
બ્રહ્માણ્ડેષુ પ્રવાહયામ ઇહ વૈ જ્ઞાનપ્રવાહં તથા
સર્વેષ્વત્ર વિચક્ષણા દ્વિજગણાઃ સ્નાત્વૈવ મુક્તિં યયુઃ ॥ ૨૨॥

ધારોત્પદ્ય હિ દેવનાયક ! વિભો ! સર્ગસ્થિતિધ્વંસકૃ-
દ્વિશ્વવ્યાપકકર્મણોઽપિ ભવતસ્ત્વય્યેવ સંલીયતે ।
સર્વે દેવગણાઃ સદૈવ ભવતામઙ્ગીભવન્તો મુદા
પ્રત્યેકં જનિરક્ષણક્ષયવિધેર્બ્રહ્માણ્ડપુઞ્જેઽનિશમ્ ॥ ૨૩॥

સામઞ્જસ્યમહો પ્રભો ! વિદધતે કર્મવ્યવસ્થારતાઃ
ઉદ્ભિજ્જસ્વેદજરાયુજાણ્ડજગણા ભૂતવ્રજાઃ સન્તિ યે ।
સર્વે તે ચ ચતુર્વિધા હિ મનુજાનાં હે પ્રજાનાં પતે !

દેવાનાં ત્રિવિધાસ્તથાऽસુરગણાનાં યે ચ લોકા અહો ॥ ૨૪॥

ત્વત્તો બુદબુદવન્મહાર્ણવ ઇહ ત્વય્યેવ પ્રોદ્ભૂય તે
લીયન્તે પિતરોऽપિ શક્તિમતુલાં ત્વત્તો ગૃહીત્વૈવ ચ ।
કૃત્વા મર્ત્યગણોન્નતિં ક્રમગતાં સાહાય્યમાતન્વતે
ભૂતૌઘસ્ય ચતુર્વિધસ્ય નિયમે લોકવ્રજસ્યાપ્યલમ્ ॥ ૨૫॥

તત્ત્વેભ્યોऽપિ ભવાનતીતવિભવો નૂનં ચતુર્વિંશતે-
ર્યદ્યપ્યસ્તિ તથાપિ ધીશ ! નુ મહત્તત્ત્વેऽન્તિમે પ્રાણિનઃ ।
નિત્યોऽનિર્વાચનો વિકારરહિતો જ્ઞાનસ્ય શક્તયાસ્થિતાઃ
સર્વાનભ્યુદયસ્ય દર્શયતિ વૈ મોક્ષસ્ય માર્ગં તથા ॥ ૨૬॥

યે સ્વાતન્ત્ર્યમદેન મોહિતતમા જીવાઃ પ્રમાદેન વૈ
મૃઢા જ્ઞાનનિધેસ્તવેઙ્ગિતમહો નિત્યં તિરસ્કુર્વતે ।
ભ્રાન્તા દુઃખદજન્મમૃત્યુગહને સંસારચક્રે ધ્રુવં
શંયોરભ્યુદયાધ્વનોહિ પતિતા દુઃખાન્યલં ભુઞ્જતે ॥ ૨૭॥

ભર્ગો વિશ્વસમર્ચિતં યદિહ તે હ્યાસ્તે દયાસાગર !
તન્નો બુદ્ધિમહર્નિશં ગણપતે ! શક્ત્યા સ્વયા સત્વરમ્ ।
સંરક્ષ્યાસત એવ કર્મનિવહાત્ સત્કર્મણિ પ્રેરયેત્
સિદ્ધ્યાऽલઙ્કૃતવામપાર્શ્વ ! ભગવંસ્ત્વાં સન્નમામો વયમ્ ॥ ૨૮॥

વ્યાસ ઉવાચ ॥ ૨૯॥

ઉક્ત્વર્ષયસ્તસ્થુરિતિ ક્ષણં તે
રોમાઞ્ચિતા ગદ્ગદકણ્ઠશબ્દાઃ ।
સાનન્દજાતાશ્રુમુખાઃ સ્થિરાશ્ચ
વિહસ્ય ધીશો મધુરં તદોચે ॥ ૩૦॥

ગણપતિરુવાચ ॥ ૩૧॥

દશાયાં યોગયુક્તાયાં રૂપં મે સગુણં દ્વિજાઃ ! ।
આત્મયુક્તદશાયાઞ્ચ વિરાડ્રૂપં મહાદ્ભુતમ્ ॥ ૩૨॥

કર્મયુક્તદશાયાન્તુ મમોપાસ્તૌ સહાયકમ્ ।
મદ્વિભૂતિમયં રૂપં ભક્તાઃ ! સ્યાચ્છ્રુતિરિત્યહો ! ॥ ૩૩॥

સ્વાધીનઃ પ્રાકૃતશ્ચૈવ દ્વિવિધો જીવ ઈરિતઃ ।
ગજોऽહં પ્રાકૃતે જીવે સ્વાધીને માનવસ્તથા ॥ ૩૪॥

અતોઽહં ભક્તવૃન્દેભ્યો મર્ત્યદેહો ગજાનનઃ ।
દર્શનં સ્વં પ્રયચ્છામિ પ્રાદુર્ભૂય નિરન્તરમ્ ॥ ૩૫॥

રાજયોગોઽસ્મિ યોગાનામહમેવંવિધોઽપિ સન્ ।
ચતુર્વિધેષુ ધ્યાનેષુ પઞ્ચોપાસ્તેરહં ધ્રુવમ્ ॥ ૩૬॥

પઞ્ચાધ્યાનયુતં સ્થૂલ-ધ્યાનમસ્મિ દ્વિજોત્તમાઃ ! ।
નૈવાત્ર સંશયઃ કશ્ચિત્ સત્યં સત્યં બ્રવીમિ વઃ ॥ ૩૭॥

નરેષુ નરનાથોસ્મિ રાજ્યે તુ સચિવાભિધઃ ।
મન્ત્રિણાં મણ્ડલં યસ્માજ્જ્ઞાનસ્યાસ્તે સહાયકમ્ ॥ ૩૮॥

શક્તિષ્વહં દૈવશક્તિરીદૃશોઽહન્તુ સન્નપિ ।
લૌકિકે શક્તિપુઞ્જેઽસ્મિ સઙ્ઘશક્તિર્મહર્ષયઃ ! ॥ ૩૯॥

આધ્યાત્મિક્યાધિદૈવ્યાધિભૌતિક્યઃ શક્તયોઽખિલાઃ ।
સઙ્ઘશક્તૌ પ્રકાશન્તે સ્વયમેવ યતો ધ્રુવમ્ ॥ ૪૦॥

વર્ણેષુ બ્રાહ્મણશ્ચાહમાશ્રમેષ્વન્તિમાશ્રમઃ ।
વૃદ્ધત્ત્વેનૈવ પૂજ્યેષુ સર્વવૃદ્ધેષ્વહં દ્વિજાઃ ! ॥ ૪૧॥

સર્વથા જ્ઞાનવૃદ્ધોઽસ્મિ નાત્ર કાર્য્યા વિચારણા ।
અધ્યાત્મલક્ષ્યસંયુક્ત આર્યોઽહં માનવેષુ ચ ॥ ૪૨॥

ભક્તેષુ જ્ઞાનિભવતોઽસ્મિ વેદાનાં સામનામકઃ ।
કિન્તુ વેદવિભાગેષૂપનિષદ્રૂપભાગહમ્ ॥ ૪૩॥

પ્રત્યાહારશ્ચ યોગાનામષ્વસ્મિ પરન્ત્વહમ્ ।
સમાધિર્નિર્વિકલ્પોઽસ્મિ નિખિલેષુ સમાધિષુ ॥ ૪૪॥

મન્ત્રયોગેષુ મન્ત્રોઽસ્મિ પ્રાણાયામો હઠે દ્વિજાઃ ! ।
લયક્રિયા લયે યોગે રાજયોગે વિવેચનમ્ ॥ ૪૫॥

બ્રહ્મદાનઞ્ચ દાનેષુ તપસ્યાસુ યમસ્તથા ।
જ્ઞાનપ્રકાશકત્વાચ્ચ કર્મયજ્ઞેષુ ભો દ્વિજાઃ ! ॥ ૪૬॥

નિત્યકર્માસ્મ્યહં નૂનં નાત્ર કાચિદ્વિવેચના ।
ઉપાસ્તિયજ્ઞજાતેષુ પરાભક્તયા સમન્વિતા ॥ ૪૭॥

બ્રહ્મોપાસ્તિરહો વિજ્ઞા અસ્મ્યહં બ્રાહ્મણોત્તમાઃ ! ।

મનનં જ્ઞાનયજ્ઞેષુ મહાયજ્ઞેષ્વહં તથા ॥ ૪૮॥

બ્રહ્મયજ્ઞોऽસ્મિ ભો વિપ્રાઃ ! સર્વયજ્ઞશિરોમણિઃ ।
વક્તાऽસ્મ્યહં સભામધ્યે આચાર્ય્યઃ શિક્ષકેષુ ચ ॥ ૪૯॥

ઉપદેશકન્દેષુ જગત્પૂજ્યોऽસ્મ્યહં ગુરુઃ ।
આત્માऽહમસ્મિ ભો વિપ્રાઃ ! ભૂતવૃન્દેષ્વવસ્થિતઃ ॥ ૫૦॥

પ્રાણિપુઞ્જષુ ચૈતન્યમહમેવ ન સંશયઃ ।
નાદઃ શબ્દસમૂહેષુ વાક્યેષ્વોઙ્કાર એવ ચ ॥ ૫૧॥

ઇન્દ્રોऽહં દેવવૃન્દેષુ ભૃગુરસ્મિ મહર્ષિષુ ।
યમો નિયામકેષ્વસ્મિ પિતૃમધ્યેऽર્યમાભિધઃ ॥ ૫૨॥

અસુરેષુ બલિર્જ્ઞેયો જાહ્નવ્યસ્મિ સરિત્સુ ચ ।
જલાશયેષુ સર્વેષુ સાગરોऽસ્મિ ન સંશયઃ ॥ ૫૩॥

પુષ્પમાનન્દદેષ્વસ્મિ પદાર્થેષુ મહર્ષયઃ ।
પવિત્રં પરમં વિપ્રાઃ ! તેજસ્તેજસ્વિનામહમ્ ॥ ૫૪॥

બલં બલવતામસ્મિ કામરાગવિવર્જિતમ્ ।
ધર્માવિરુદ્ધો ભૂતેષુ કામોऽસ્મિ જનનાય ચ ॥ ૫૫॥

વિદ્યાસ્વધ્યાત્મવિદ્યાऽસ્મિ વિદ્વાંસો બ્રાહ્મણોત્તમાઃ ! ।
સત્યપ્રકાશકશ્ચાસ્મિ વાદો વાદિગણેષ્વહમ્ ॥ ૫૬॥

નારીષ્વહં તપોરૂપો યજ્ઞરૂપો નરેષુ ચ ।
ગુણત્રયેષ્વહં વિપ્રાઃ ! ગુણાઃ સત્ત્વાભિધાનકઃ ॥ ૫૭॥

ભાવત્રયેऽધ્યાત્મભાવઃ શીલેષુ વિનયોऽસ્મ્યહમ્ ।
સદાચારેષુ વૃદ્ધાનાં પ્રગતિઃ પાદપદ્મયોઃ ॥ ૫૮॥

કારણબ્રહ્મરૂપેણ હ્યેકોऽદ્વૈતોऽપ્યહં દ્વિજાઃ ! ।
અનન્તોऽસ્મિ મહાવિજ્ઞાઃ ! સત્યમેતન્ન સંશયઃ ॥ ૫૯॥

અનન્તત્વાત્સઙ્ખ્યયા મે કાર્યબ્રહ્મસ્વરૂપતઃ ।
સઙ્ખ્યાતું નૈવ શક્નોતિ વિભૂતીઃ કશ્ચિદપ્યો ॥ ૬૦॥

ભવતાં વિપ્રવર્ય્યાણાં કલ્યાણાર્થં હિ કેવલમ્ ।
દિગ્દર્શનસ્વરૂપેણ કિઞ્ચિદ્વો વર્ણિતં મયા ॥ ૬૧॥

ઉપદેશઞ્ચ મે હૃદ્યં ધૃત્વા સ્વહૃદયેઽનિશમ્ ।
મમોપાસ્તૌ રતાઃ સન્તો ભજધ્વં મોક્ષમુત્તમમ્ ॥ ૬૨॥

શ્રદ્ધા વઃ સાત્ત્વિકી વિપ્રાઃ ! પ્રકતૌ મે ચિરં વસેત્ ।
મમૈવ પ્રકૃતિર્ધૃત્વા સ્ત્રીભાવં કામદાયિની ॥ ૬૩॥

બિભ્રાણાં ભગિનીભાવમર્થસિદ્ધિપ્રદાયિની ।
ધરન્તી માતૃભાવઞ્ચ શક્તિધર્મમ્પ્રદા સદા ॥ ૬૪॥

ભૂત્વા મે જ્ઞાનિનો ભક્તાન્ પ્રકૃતિસ્થાન્ સમન્તતઃ ।
તેભ્યો મુક્તિપદં દત્તે વિદધાના સુદુર્લભમ્ ॥ ૬૫॥

શ્રદ્ધાન્વિતાનાં મચ્છક્તૌ ભક્તાનાં સુલભો ભવેત્ ।
ચતુર્વર્ગો ન સન્દેહો વિદ્યતેઽત્ર દ્વિજોત્તમાઃ ! ॥ ૬૬॥

અત્યન્તં ગોપનીયા વઃ શ્રાવિતોપનિષન્મયા ।
ધીશગીતાભિધાનેન લોકેષ્વેષા પ્રચાર્યતામ્ ॥ ૬૭॥

યયા મે નિખિલા ભક્તાશ્ચતુર્વર્ગમવાપ્નુયુઃ ।
એષા નૈવ પ્રદાતવ્યા નાસ્તિકેભ્યઃ કદાચન ॥ ૬૮॥

પાપિભ્યોઽશ્રદ્દધાનભ્યઃ પ્રાણિભ્યો બ્રાહ્મણોત્તમાઃ ।
અભક્તેભ્યઃ કૃતઘ્નેભ્યો ગુરુદ્રોહિભ્ય એવ ચ ॥ ૬૯॥

શ્રદ્ધા શ્રીગુરુવાક્યેષુ યેષાં શાસ્ત્રગણેષ્વપિ ।
વિશ્વાસઃ પરલોકેષુ લક્ષ્યમાધ્યાત્મિકં તથા ॥ ૭૦॥

મત્પરાયણતા પુણ્યા વર્તતે ચ નિરન્તરમ્ ।
ઇયં તેભ્યઃ પ્રદાતવ્યા ધીશગીતા ધ્રુવં દ્વિજાઃ ! ॥ ૭૧॥

ધીશગીતામિમાં પુણ્યાં પાઠયન્તિ પઠન્તિ યે ।
ક્લેશકર્મવિપાકેભ્યો રહિતા આશયેન ચ ॥ ૭૨॥

ભજન્તે મેઽખિલા ભક્તા મત્સાયુજ્યમસંશયમ્ ।
ન ચ તાન્ બાધતે કશ્ચિત્તાપો લોકે કથઞ્ચન ॥ ૭૩॥

કલ્યાણજનનીમેતાં શ્રદ્ધયૈવ પઠન્તિ યે ।
એતયા યેઽથવા યાગં ગાણપત્યં પ્રકુર્વતે ॥ ૭૪॥

હવનાત્મકમાહોસ્વિત્ કેવલં પાઠરૂપકમ્ ।
તેષાં નશ્યન્તિ ભક્તાનામાધયો વ્યાધયોઽખિલાઃ ॥ ૭૫॥

સંયતા યે તપોનિષ્ઠા ભક્તિભાવેન કુર્વતે ।
પાઠસ્ય શ્રવણં સમ્યગેતસ્યાઃ સાર્થકં દ્વિજાઃ ! ॥ ૭૬॥

ગાણપત્યસ્ય યાગસ્યાનુષ્ઠાનં વૈતયા સદા ।
કાચિદ્બાધા ન તેષાં સ્યાદ્વિપત્તિઃ પ્રાણિનાં તથા ॥ ૭૭॥

તાદૃશી વિઘ્નરાશિર્વા નશ્યેદ્યા નૈવ સત્વરમ્ ।
નાત્ર કઞ્ચન સન્દેહો વિદ્યતે બ્રાહ્મણોત્તમાઃ ! ॥ ૭૮॥

આર્તા જિજ્ઞાસવો ભક્તાસ્તથાઽર્થાર્થિન એવ વૈ ।
ત્રિવિધા એવ મે ભક્તા એતદ્ગીતાશ્રયેણ હિ ॥ ૭૯॥

સ્વમનોરથસાફલ્યં લભેરન્નાત્ર સંશયઃ ।
તથૈવાસ્યાશ્ચ ગીતાયાઃ શ્રવણાન્મનનાત્તથા ॥ ૮૦॥

નિદિધ્યાસનતો નૂનં જ્ઞાનિભક્તાશ્ચ મામકાઃ ।
અપરોક્ષાનુભૂત્યા મે દર્શનં કર્તુમીશતે ॥ ૮૧॥

ચતુર્વર્ણાશ્રમસ્થાનાં સ્વધર્માસક્તચેતસામ્ ।
જીવાનાં કિનુ(કિન્નુ?) વક્તવ્યં શ્રદ્ધાલુનાં મયિ ધ્રુવમ્ ॥ ૮૨॥

સર્વેષામેવ જીવાનાં ચતુર્વર્ગફલપ્રદા ।
વર્તતે ધીશગીતેયં સત્યં સત્યં ન સંશયઃ ॥ ૮૩॥

ઇતિ શ્રીધીશગીતાસૂપનિષત્સુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે
ધીશર્ષિસંવાદે વિરાટ્સ્વરૂપનિરૂપણં નામ
સપ્તમોઽધ્યાયઃ ।

સમાપ્તેયં શ્રીધીશગીતા ।

Proofread by Mohan Chettoor

*Shri Dhisha Gita*

pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*